PURANETIHASA

ACHARYA 2nd YEAR
Course/Paper.6

**PART - B**

श्रीमद्भागवतमहापुराणम् (एकादशस्कन्धे १-२५ अध्यायाः)

# *Śrīmadbhāgavatamahāpurāṇam*

***(ēkādaśaskandhē 1-25 adhyāyāḥ)***

**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# प्रथमोऽध्याय:

## प्रस्तावना –

श्रीमद्भागवतमहापुराणं पुराणेषु श्रेष्ठस्थानं तथा समेषां वैष्णवानां परमप्रियं भवति। अस्मिन् पुराणे भक्ते: ज्ञानस्य उपासनायाश्च साश्वतसमागमो वर्तते। विविधेषु लक्षणेषु परिपूर्णमिदं महापुराणं समेषां तदितरपुराणानां लक्षणं तथा महत्त्वं वर्धयति। अस्मिन् महापुराणेद्वादशस्कन्धा: विराजन्ते। तेषु स्कन्धेषु विविधा: विषया: प्रोच्यन्ते। भगवत:श्रीकृष्णस्य लीलाविग्रहस्वरूपादीनां विधिवत् विवरणं विहितं विद्यते। पुराणेषु महर्षिणा व्यासदेवेन रचितमन्तिमं पुराणं भवति श्रीमद्भागवतमहापुराणम्। द्वादशस्कन्धेषु एकादशस्कन्धस्य माहात्म्यं भक्तियोगं ज्ञानयोगं च दृष्ट्या सर्वोत्कृष्टम्। अध्यायेऽस्मिन् विधिवत् श्रीकृष्णस्य लीलानन्तरं ब्राह्मणै: यदुवंशविनाशाय प्रदत्तस्य शापस्य विषये वर्ण्यते। ज्ञानयोगमादाय श्रीकृष्णेन बहुविषय: प्रोक्तो वर्त्तते।

## उद्देश्यानि

अस्मिन् अध्याये पाठका: सर्वे एतान् सर्वान् विन्दून् ज्ञास्यन्ति।

- यदुवंशस्य विनाशाय ऋषीणां शाप:
- वसुदेवं प्रति नारदस्य आगमनम्
- निम्युपाख्यानम्
- महात्माकवे: भगवद्विषयक: सम्वाद:
- हरे: भगवद्भक्तस्य लक्षणवर्णनम्
- अन्तरिक्षस्य मायाविषयकं वर्णनम्
- चतुर्थयोगीश्वरस्य प्रवृद्धस्य सम्वाद:

**यदुवंशस्य विनाशाय ऋषीणां शापः**

पृथिव्याः भारं लाघवार्थं भगवान् श्रीकृष्णः वलरामेण सह बहूनां दैत्यानां संहारं चकार। कौरवपाण्डवानां मध्ये कलहं कृत्वा सर्वान् कौरवान् ननाश। पाण्डवाः द्युतक्रीडायां सर्वं तत्याजुः। ततः दुर्योधनदुःशासनादयः कर्णेन सह द्रौपद्याः बहुनिन्दां चक्रतुः। ततः परिशेषेण पाण्डवकौरवयोः भीषणयुद्धः समायात;। कुरुक्षेत्रस्य रणप्राङ्गणे सर्वे स्वजनाः परस्परं कलहं कृत्वा स्वीयप्राणान् समर्पितवन्तः। अनेन पृथिव्याः भारः न्यूनतां गतः। भगवान् श्रीकृष्णः अप्रमेयः साक्षात् परब्रह्मपरमस्वरूपः। यादवानां अप्रमितशक्त्या पृथिव्यां पापीनां विनाशं चकार। परन्तु सर्वान्तर्यामी भगवान् श्रीकृष्णः स्वस्य वंशस्य विनाशार्थमपि प्रयासं चकार। कदाचित् सर्वे यादवाः अपि स्वशक्त्या पृथिव्यां भारसदृशाः आसन्। तेषां विनाशार्थं श्रीकृष्णः उपायं चिन्तयामास। यतोहि श्रीकृष्णस्य छत्रछायायां सन्तः पृथिव्यां सर्वे यादवाः कान् अपि भ्रुक्षेपं न चक्रुः। ततः अन्तः कलिं विधाय अहमपि मदीयं लोकं प्रति व्रजामि इति श्रीकृष्णः चिन्तयामस। ब्राह्मणानां परमप्रियः श्रीकृष्णः एव मयाम् अरचयत्। कदाचित् यादवपुत्राः क्रीडन्तः आसन्। विश्वामित्रवामदेवासितकण्व-दुर्वासाभृगुकश्यपाङ्गिरात्रिवशिष्ठनारदादय सर्वे महर्षयः पिण्डारकक्षेत्रं प्रति जग्मतुः। तदानीम् एते सर्वेऽपि यादवपुत्राः क्रीडन्तः आसन्। सर्वे अविनताः यदुनन्दनाः क्रीडन्तः तान् ऋषीन् उपव्रज्य विनीतवत् पप्रच्छुः। सर्वे यदवपुत्राः जाम्ववत्याः पुत्रं साम्वं स्त्रीवेषैः वेषयित्वा ब्राह्मणान् एषा गर्भवती कन्या इति प्रोचुः। एतस्या किं भविष्यति पुत्रः पुत्री वा इति, एषा असितेक्षणा भवति। परन्तु एतस्य किं भविष्यति। सर्वेऽपि धुर्ताः यादवपुत्राः तैः ऋषिभिः सार्द्धं उन्मत्तवत् व्यवहारं चक्रुः। एषा किंस्वित् सञ्जनयिष्यति इति ।

सर्वेऽपि कुपिताः ऋषयः एतेषां धुर्ततां दृष्ट्वा मुसलं जनयिष्यति इति प्रोचुः। ततः मुनीनां वचनं श्रुत्वा सर्वेऽपि यादवपुत्राः साम्वस्य उदरं विमुच्य ददृशुः। तत्र सः एकं मुसलम् दृष्ट्वा चकिताः अभूवन्। किं जनाः वदिष्यन्ति इति विह्वलिताः सन्तः सर्वेऽपि तं मुसलं स्वीकृत्य गृहं प्राविवेशुः। तदानीं तेषां मुखे क्लान्तिः नासीत्। ब्राह्मणानां शापः अमोघः वर्तते। सर्वेऽपि यादवाः तं मुसलं दृष्ट्वा तथा सर्वं श्रुत्वा विस्मिताः अभूवन्। ततः उग्रसेनस्य अज्ञानुसारं यादवाः मुसलं खण्डविखण्डितं चक्रुः। ततः तच्चूर्णं मुसलं प्रासल्लोहं समुद्रे प्रक्षेपयामासुः। किञ्चित् कालानन्तरं तानि सर्वाणि चूर्णानि तरङ्गे आगत्य समुद्रस्य कूले समागतानि जातानि वर्तन्ते। ततः एरकारूपेण तृणानि उत्पन्नानि अभूवन्। मुसलस्य यत् भागं चूर्णी नाभवत् तत् मत्सः अखादत्। तं मत्सं कश्चित् धीवरः गृहीतवान्। लौहखण्डं स्वीकृत्य सः तस्य तीरस्य अग्रभागे स्थापयामास। भगवान् श्रीहरिः सर्वं ज्ञात्वा अपि किमपि न चकार। तदन्यथा कर्तुं यद्यपि समर्थो बभूव परन्तु तथा सः न अकरोत्।

**बोधप्रश्नः**

१. यादवपुत्रेभ्यः के शापं दद्युः?

२. पाण्डवकौरवयोः युद्धः कुत्र बभूव?

## वसुदेवं प्रति नारदस्य आगमनम्

श्रीकृष्णस्य दर्शननिमित्तं नारदः वारम्वारं तत्र आजगाम। यस्य श्रीकृष्णस्य उपासना ब्रह्मादि सर्वे लोकपालाः देवराजेन्द्रादयः कुर्वन्ति तस्य वा दर्शनं कः कर्तुं न इच्छति। कदाचित् नारदः श्रीकृष्णस्य द्वारकपुरीं प्रति समागतः बभूव। तस्मिन् समये श्रीकृष्णः द्वारकायां नासीत्। वसुदेवः नारदस्य सत्कारं

चकार। आदरेण प्रणामपुर:सरं नारदस्य अभ्यर्थनाम् अकरोत्। वसुदेव: नारदं प्रति प्रोवाच हे भगवन्! भवान् एव सर्वेषां प्राणिनां समुद्धारे हेतु:। पुण्यश्लोकस्य भगवत: मार्गं: सदासर्वदा ग्रहणं कृत्वा त्रिलोके विचरणं करोति। भवतामागमनं सर्वेषां प्राणिनां हितकाराय भवति। साधूनां कार्यकलापं कस्य वा मङ्गलं न वितनोति। य: यादृशं कर्म आचरति तादृशं फलं लभते स। भगवद्धर्मस्य विषये भवत: सकाशात् अहं ज्ञातुमिच्छामि। यत् श्रवणेन मनुष्याणां सकलपापानां क्षयो भवति। परमपुण्यलोकं प्रति व्रजति। भगवान् विष्णु: मोक्षदाता वर्तते। यं पुत्ररूपेण लब्ध्वा अहं धन्य: अभवम्। संसारस्य दु:खं सुखमिव प्रतीयते। कथमेतस्मात् वन्धनात् मुच्येत ? तस्य सरलमुपायं ब्रुहि ?

नारद: श्रद्धया भगवद्धर्मान् प्रोवाच। यस्य धर्मस्य श्रवणमात्रेणैव मननमात्रेणैव चिन्तनमात्रेणैव ध्यानमात्रेणैव मनसि क्लान्ति: व्यपगता भवति स: धर्म: भगवद्धर्म: इति प्रोच्यते। तस्य धर्मस्य आचरणेनैव मानवानां परमसिद्धि: भवति। तेन आचरणेन सर्वे पूता: भवन्ति। भगवद्धर्मस्य आचरणं सर्वै: कार्यम्। य: धर्म: इहकाले परकाले च मोक्षप्रद: भवति। भगवत: चिन्तनमाध्यमेनैव सकलदु:खानां विनाशो भवति। अत: स: धर्म: सर्वै: अनुसर्तव्य:। येन संसारस्य पाशान्मुक्त: मानव: इहलोके परलोके सुखेन मुक्तरूपेण तिष्ठति। भगवद्धर्मस्य आचरणं कृत्वा बहव: जना: विष्णुलोकं लब्ध्वा कालयापनं कुर्वन्ति। संसारस्य पापतापहारकस्य श्रीकृष्णस्य चरणकमले अनन्याभाक्तिं सम्पाद्य मोक्षाख्यं तत्त्वं प्रति सर्वे व्रजन्ति।

**बोधप्रश्न:**

१. नारदं प्रति भगवत्प्राप्ते: उपायं क: पप्रच्छ ?

२. संसारस्य पापतापहारक: क: ?

**निम्युपाख्यानम्**

पूर्वं विदेहराजा महात्मा निमिः परमयोगेश्वरः धर्मात्मा आसीत्। स्वायम्भुवमनोः पुत्रः प्रियव्रतः, प्रियव्रतस्य पुत्रः आग्निध्रः तस्य पुत्रः नाभिः, नाभेः पुत्रः ऋषभदेवः आसीत्। भगवान् ऋषभदेवः भगवतः अंशावतारः आसीत्। मोक्षधर्मस्य प्रवर्तनार्थं तथा उपदेशार्थं सोऽवतीर्णः आसीत्। तस्य शतं पुत्राः आसन्। ते सर्वे वेदविदः तथा विविधेषु शास्त्रेषु प्रौढ़ाः विद्वांसः । तेषु कश्चित् भरतः विष्णोः अनन्यभक्तः आसीत्। तस्य नामानुसारं देशस्यास्य नाम भारतमभूत्। राजर्षिः भरतः कृत्स्नं भूमण्डलं शास्ति। अन्तिमसमये संसारं त्यक्त्वा भगवदारधानां कर्तुं वनं प्रति जगाम। ततः जन्मत्रयानन्तरं तस्य भगवत्प्राप्तिरभूत्। ततः सः ब्राह्मणकुले जडभरतः इति नाम्ना प्रथितो जातः।

एतदतिरिच्य अन्ये सर्वे पुत्राः ऋषभदेवस्य विविधेषु स्थानेषु निवसन्तः आसन्। तेषु पुत्रेषु नवपुत्राः भूमण्डलस्य नवद्वीपानाम् अधिपतयः आसन्। एकाशीतिपुत्राः विविधानां कर्मकाण्डानां रचयिता तथा अग्निहोतारः आसन्। नवपुत्राः विविधेषु स्थानेषु परिव्राजकरूपेण परमार्थतत्त्वस्य प्रचारकाः आसन्। तेषु ते नवद्वीपानाम् अधिपतयः आसन्, ते सर्वेऽपि वेदविदः धर्मात्मा तथा भगवदनुरागिणः आसन्। तेषां नामानि भवन्ति कविः, हरिः, अन्तरिक्षः, प्रवुद्धः, पोप्पलायनः, अविर्होत्रः, द्रुमिलः, चमसः, करभाजनश्च। ते सर्वेऽपि अस्य चराचरात्मकस्य जगतः अधिपतिः साक्षात् विष्णुः इति जानन्ति। तेषां सर्वेषु लोकेषु अवाधेन विचरणं कर्तुं क्षमता आसीत्। ते देवसिद्धसाध्यगन्धर्व-यक्षमनुह्यकिन्नरनागादिलोकेषु सर्वदा स्वच्छन्देन विचरणं कुर्वन्तः आसन्। ते सर्वेऽपि एवं विचरणं कृत्वा कदाचित् निमेः यज्ञस्थले प्राविवेशुः। तदानीं भारतवर्षे निमिः विविधान् ब्राह्मणान् आहूय यज्ञकर्मणि लिप्त आसीत्। ते सर्वे नवार्षयः परमतेजस्विनः आसन्। ते सर्वे सूर्यवत् दीप्तिमन्तः आसन्। तान् सर्वान् स्वागतीकर्तुं सर्वे ब्राह्मणाः ऋत्विजः तथा अन्ये वेदविदः ब्राह्मणाः उपस्थिताः बभूवुः। ते सर्वे

योगेश्वरस्य विष्णोः परमभक्ताः तथा भगवद्धर्मे निपुणाः इति एषः निमिः ज्ञातवान्। ते ब्रह्मणः पुत्रानिव दीप्तिमन्तः आसन्।

तान् दृष्ट्वा निमिः भगवतः नवपार्षदाः इति चिन्तयामास। ततः तेषां विनतिं कृत्वा स्वागतं व्याजहार। मनुष्यजन्म क्षणभङ्गुरं वर्तते। भवतां दर्शनं पुण्यप्रदमिति निमिः प्रोवाच। सतां संगति अस्मिन् जन्मनि प्रमुखं कार्यं वर्तते। अतः भगवद्धर्मस्य महत्त्वं तथा तस्य स्वरूपं किमिति यदि भवन्तः कथयिष्यन्ति तर्हि मम कृते तत् अपूर्वफलस्वरूपं भविष्यति।

बोधप्रश्नः

१. कस्य देशस्य राजा निमिः आसीत्?

२. कति योगेश्वराः निमेः यज्ञस्थलं प्रति अजग्मुः?

३. ऋषभदेवस्य कति पुत्राः आसन्?

**महात्माकवेः भगवद्विषयकः सम्वादः**

निमेः भगवद्विषयकस्य प्रश्नस्य श्रवणं कृत्वा तेषु नवयोगेश्वरेषु कविः स्वस्य भगवद्विषयकस्य ज्ञानस्य भण्डारात् निमिं प्रति प्रोवाच। अस्मिन् संसारे भगवतः अच्युतस्य शरणमेव शास्वतं साधनं वर्तते भगवद्धर्मस्य । अतः सांसारिकवन्धनं त्यक्त्वा भगवतः शरणमेकान्तं काम्यं भवति। सांसारिकपदार्थेषु आसक्तः जनः अपि यदि भगवति भक्तिपूर्वकं शरणं याति तर्हि तस्य सांसारिकवन्धनात् विच्युतिः अवश्यं भवति। ये अनन्यभक्त्या भगवतः आराधनं कृत्वा शरणं प्रति गच्छन्ति तेषां कर्मवन्धनात् मुक्तिः भवति। अस्मिन् लोके सर्वत्र भगवतः सत्ता तान् परिदृश्यते। ये धर्माः भगवता आत्मलब्धये

प्रोक्ताः ते च धर्माः भगवद्धर्माः इति कथ्यन्ते। तस्य धर्मस्य अवलम्वनं कृत्वा सर्वे भगवतः अनुरागिणः भवन्ति। मानवः स्वस्य शरीरवाणीमनवुद्धीन्द्रियादिभिः यत् कर्म क्रियते तत् सर्वं भगवते यदि प्रत्यर्प्यते तर्हि तस्य मुक्तिः भविष्यति। एतान् धर्मान् भगवद्धर्मः इति प्रोच्यते।

एतदतिरिच्य अन्येषु द्रव्येषु यदि मनोनिवेशः भवति तर्हि संसारं प्रति आसक्तिर्भावना आगच्छति। अस्यां स्थितौ मनुष्यः परमात्मनः विमुखो भवति। सः मायाभ्रमे पतित्वा स्वस्य स्वरूपं विस्मरति। अवश्यमेतत् भगवतः मायायां भवति परन्तु तस्मात् विच्युतः अवश्यं भवेत्। स्वप्नावस्थायां दृश्यमान जगत् यथा वास्तवेन मिथ्या इति प्रतीयते तथैव अस्य संसारस्य सुखं वास्तवेन अनित्यं वर्तते। अतः वुद्धिमान् जनः एतेषु निवृत्तः सन् भगवति मनोनिवेशः करणीयः। अस्य मनसः भगवन्तं प्रति भक्तिः विविधेषु मार्गेषु आगच्छति। अस्मिन् लोके भगवतः यानि चरित्राणि सन्ति तथा याः कथाः सन्ति तान् सर्वान् विषयान् श्रुत्वा विविधानि गीतानि श्रुत्वा जपविधानं कृत्वा सत्संगेन सांसारिकवन्धनात् मनः विच्युतं भवति। कर्त्तव्यनिष्ठः दृढ़संकल्पितः जनः यथा भगवदनुरागेण नित्यं भगवतः नामानि अत्युच्चस्वरेण गायति, जपति हसति रोदिति तथा उन्मत्तवत् भगवतः नामकीर्तनं करोति सः परमभगवद्भक्तो भवति। तस्य संसाररस्य अहैतुकविषयं प्रति मनः न भवति। तस्मात् सांसारिकवन्धनात् प्रमुच्य अहैतुकशान्तिं प्राप्नोति सः जन। अतः भगवतः शरणं प्रति व्रज, यत्र सर्वं लभ्यते।

एवं निमेः प्रश्नस्य प्रत्युत्तरं नवयोगेश्वरेषु कविः प्रोवाच। तस्य मतानुसारं भगवद्धर्मः भगवतः शरणं मात्रमेव। अहैतुकचिन्तनेन कीर्तनेन भजेन एतादृशी भक्तिः मनसि आगच्छति। येन भगवतः सान्निध्यं लभ्यते।

बोधप्रश्न:

१. कवि: कस्य पुत्र: ?

२. भगवत: परमा शक्ति: का ?

३. कविं प्रति क: भगवत्विषयकं प्रश्नं पप्रच्छ ?

**हरे: भगवद्भक्तस्य लक्षणवर्णनम्**

राजा निमि: प्रथमयोगेश्वरस्य मुखकमलात् भगवद्विषयकं ज्ञानं लब्ध्वा तस्य भगवद्भक्तस्य लक्षणं किमिति पप्रच्छ: । स: भगवद्भक्त: जनेषु कथमाचरति ? कीदृशं वक्ति ? किं तस्य लक्षणं कथं भगवत: स: प्रियपात्रो भवति ? इत्यादय: बहून् प्रश्नान् पप्रच्छ। तस्य प्रत्युत्तरं नवयोगेश्वरेषु द्वितीय: हरि: अभाषत।

इन्द्रियार्थान् कामान् गृहीत्वा अपि य: जन: मनसि द्वेष्टि न भवति तथा न हृष्यति स: भगवद्भक्त: प्रोच्यते। विष्णो: माया इयमिति विचिन्त्य इन्द्रियार्थान् प्रति मनोनिवेशं न करोति स: भागवतोत्तम: इति हरि: प्राह। जन्ममृत्यु-क्षुधापिपासादिधर्मा: आगत्य पुन: प्रतिमुञ्चन्ति परन्तु य: भगवत: भक्त्या असीमानन्दं प्राप्नोति तथा अहैतुकीं भक्तिमाचरति स: परमभागवत: इति। यस्य जनस्य देहादिविषयेषु प्रफुल्लित: न भूत्वा कर्मप्रवृत्तौ आसक्त: न सन् भगवत: वासुदेवस्य भजने ध्याने मग्न: भवति स: परमभागवत: इति कथ्यते।

य: जन: जन्मकर्मवर्णधर्मान् स्वीकृत्य तथा शरीरबुद्धीन्दियाणि गृहीत्वा तान् प्रति आसक्तो न भवति स: भगवत: परमप्रिय: भवति। य: भेदभावं न गृहीत्वा सर्वत्र समं पश्यति सङ्कल्पितस्य कार्यस्य यत्किमपि भवतु तत्र शान्तो भवति स: भगवत: परमप्रिय: भवति। परन्तु य: देहादिधर्मान्

त्यक्तुमसमर्थः परन्तु भगवति भक्ति विद्यते चेदपि तस्य संसारवन्धनात् मुक्तिः न भवति। कदाचिदपि भगवतः सान्निध्यं लब्धुं स न शक्नोति। परन्तु भगवतः प्रियः सो भवति यस्य सांसारिकवासनातः मनः दूरे भवति। धनादिषु मनः न लगति, भगवतः अनन्यभक्तिः एव तस्य परमं धनं भवति, सः वैष्णवानां परमप्रियो भवति। भगवतः नामस्मरणेन तादृशी शक्ति विद्यते यस्य नामस्मरणेन मनसि क्लान्ति दूरीभवति, मनसि सदासर्वदा भगवान् तिष्ठति। तस्य हृदयं त्यक्त्वा हरिः न विसृजति। भगवतः चरणकमलं यः भक्तः श्रद्धया तथा प्रेमरज्ज्वा वन्धनं करोति सः भक्तः भक्तेषु श्रेष्ठो भवति।

बोधप्रश्नः

१. भगवत्प्राप्तेः मुख्यं लक्षणं किम्?

२. कः भगवतः सान्निध्यं प्रति गन्तुं न शक्नोति?

**अन्तरिक्षस्य मायाविषयकं वर्णनम्**

भगवान् श्रीविष्णोः माया अनन्ता। न कश्चिदपि मायां तर्त्तु शक्नोति। परन्तु मायामयस्य परब्रह्मणः मायायाः स्वरूपं कीदृशमिति निमिः तान् योगेश्वरान् पप्रच्छ। भगवतः कथारूपममृतं श्रोतुं तस्य राज्ञः उत्कण्ठा अवर्धत। ततः तस्य प्रश्नस्य उत्तररूपेण तृतीययोगीश्वरः अन्तरिक्षः तं राजानं सकलं रहस्यं श्रावयामास।

सकलानां जीवानामात्मा भवति नारायणः। पञ्चमहाभूतमाध्यमेनैव सकलानां जीवानां सृष्टिं चकार। सर्वेभ्यः भूतेभ्यः विषयभोगं प्रदातुं विविधानि द्रव्यानि तेन निर्मितानि सन्ति। सकला सृष्टिः तस्य भगवतः स्वरूपमात्रम्। अन्तर्यामीरूपेण सकले घटे विद्यमानः सन् मनः तथा दशेन्द्रियमाध्यमेन गुणान् भुञ्जति। परन्तु गुणेषु सः आकृष्टः न भवति। तत्तत् कर्मफलं गृह्णन् सः  जीवः संसारे भ्रमति।

प्रलयकाले सर्वाणि वस्तूनि स्थूलसूक्ष्मरूपेण अव्यक्तं प्रति अपकर्षन्ति। प्रलयकालसमागते भगवतः सङ्कर्षणमुखात् प्रचण्डाग्निः निष्कर्षो भवति। ततः भगवतः एव प्रेरणायां वायुः तमाग्निं पाताललोकं दग्धीकरोति। चतुर्पार्श्वे अग्निशिखा अविरतभावेन विश्वं प्रज्वालयति। ततः प्रचण्डोत्तापस्य परिणामस्वरूपं वृष्टिः भवति। तेन सम्पूर्णं जगत् जले विलीनो भवति।

इन्धनाभावे यथा अग्नि स्व अव्यक्तत्वेन लीनो भवति, तथा प्रलयकाले विराटरूपी भगवान् स्वाव्यक्तभावेन विपरिणमते। तस्मिन् प्रलयकाले पृथिव्याः गन्धतन्मात्रं वायौ लीयते। तद्वत् जलस्य रसतन्मात्रं वायुः शुष्यति। ततः एकैकं उत्तरोत्तररूपेण आकाशे सर्वं विलीयते। कालस्वरूपः इश्वरः आकाशस्य शब्दतन्मात्रं हरति, तदनन्तरमाकाशः अहङ्कारे लीनो भवति। अहङ्कारोऽपि स्वस्य प्रकृतिभूतस्य महत्तत्त्वस्य आश्रयं स्वीकरोति। अनेन प्रकारेण भगवान् त्रिगुणमयस्वरूपेण समग्रस्य सृष्टेः उत्पत्तिस्थितिसंहाराणां कारणभूतो भवति। एवं भगवान् स्वीयमायायामेव जगत् सृजति, स्वमायायामेव जगतः विनाशं करोति। अतः अस्य मायामयस्य भगवतः मया अत्यन्त कठिना। साधारणजनानां कृते तत् तर्त्तुंमतीव कठिनविषयो वर्तते। उपयुक्तभगवद्धर्माचरणेन संसारस्य प्रति अनासक्तभावेन अनन्यभक्ति माध्यमेन भगवतः सान्निध्यं लभ्यते।

बोधप्रश्नः

१. अहंकारस्य आविर्भावः कस्माद् भवति ?

२. कस्य माया अतीव कठिना विद्यते ?

३. तृतीयः योगेश्वरः कः ?

**चतुर्थयोगीश्वरस्य प्रबृद्धस्य सम्वादः –**

राजर्षिः निमिः ततः मायायाः तारणनिमित्तं प्रश्नं पप्रच्छ। कथं जनाः मायामेतां तरन्ति इति? अस्य प्रश्नस्य उत्तरं भगवान् योगीश्वरः प्रवुद्धः प्रस्तौति। जनाः कर्माणि सुखमयानि कर्तुं विविधानि उपायानि चिन्तयामासुः। परन्तु सर्वेषां कर्माणि सुखमयानि न भवन्ति। कदाचित् कर्माणि सुखोद्देश्येन क्रियमानानि दुःखमयानि भवन्ति। अतः कर्माणि अनासक्तानि भवेयुः। काम्यकर्मणः निवृत्तिः करणीया भवति। यथा आसक्तकर्मसु शास्वतशान्ति न लभ्यते तथैव अस्मिन् लोके क्रियमाणमासक्तकर्म परलोके शान्तिप्रदायकं न भवति। इहलोके परस्परयोः मध्य सर्वदा अनासक्तिः ईर्षा द्वेषभावना विद्यते। परन्तु परलोके तथा किमपि न भवति। रागद्वेषनिष्णातः जनः सुखं न लब्धुं शक्नोति। अतः परमात्मनि दृढ़प्रतिष्ठितं जनं तथा अनासक्तं गुरुरूपेण चयनं कर्त्तव्यम्। साधकाः सर्वादौ सर्वत्र अनासक्तिभावना आनेतव्या वर्तते। ततः दयाक्षमादिगुणान् स्वीकृत्य सर्वैः सह मित्रता विनम्रता प्रदर्शनीया भवति। वाह्याभ्यन्तरे पूतीभूत्वा स्वधर्माचरणे रतः स्यात्। व्रह्मचर्यादीनामाचरणं कृत्वा सुखदुःखमोहमायाहर्षविषादादिषु सर्वदा विमुक्तः भवेत्। भगवत्प्राप्तिनिमित्तं मार्गप्रदर्शनीयानि शास्त्राणि अध्येतव्यानि। वचने शरीरे च शुद्धता अपेक्ष्यते। सत्याचरणं तथा मनोनिग्रहवान् भूत्वा मनसः शान्ति स्थापनार्थं प्रवृत्तो भवेत्। हरेः नाम स्मरणं कीर्तनं ध्यानं च कर्त्तव्यम्। सर्वं भगवति अर्पयित्वा सकलेषु जीवेषु गुणेषु द्रव्येषु च भगवतः सत्ता द्रष्टव्या भवति। अत्यन्तश्रद्धा पूर्वकं भगवति विश्वासः स्थापनीयः। कर्मणि विश्वासं कृत्वा अन्तः सर्वदा भगवति प्रेममयभावना आनेतव्या भवति। अनेन सांसारिकासाक्तिं परित्यज्य आत्मसन्तोषी भूत्वा आध्यात्मिकशान्तिमनुभवेत्। भगवान् श्रीकृष्णः क्षणनैव सर्वं पापं नाशयितुं सक्षमो वर्तते। सर्वदा तस्य स्मरणं ध्यानं च कर्त्तव्यम्। भगवद्भक्तिरेव मायायाः तारणे साधनभूता वर्तते। भक्त्या एव अस्याः मायायाः अतिक्रमः कर्तुं शक्यते।

बोधप्रश्न:

१. कया शक्त्या मायाया: अतिक्रमं कर्तुं शक्यते ?

२. कस्मात् कर्मण: निवृत्ति करणीया भवति

## सारांश:

अध्यायेऽस्मिन् श्रीकृष्ण: पाण्डवकौरवयोर्मध्ये कलहं कारयित्वा पृथिव्या: भारं लाघवं चकार। यादवानां विनाशार्थं ब्राह्मणानां शाप: वर्णित:। मुसलस्य प्रादुर्भाव: तथा उग्रसेनस्य आज्ञानुसारं तस्य मुसलस्य खण्डंविखण्डितं कृत्वा समुद्रे क्षेपणस्य विषय: प्रस्तुत:। तत् मुसलखण्डस्य मत्स्यगर्भात् पुन: प्राप्तिरभूत्। तेन लौहखण्डेन तीरनिर्माणं प्रतिपादितं विद्यते। देवर्षे: नारदस्य वसुदेवं प्रति आगमनं भगवत्स्वरूपस्य वर्णनं कथोपकथनं च प्रतिपादितं विद्यते। भगवत्प्राप्तिविषयकं महात्मानिमे: आख्यानं कथामाध्यमेन प्रस्तुतं वर्तते। ऋषभदेवस्य शतपुत्राणां विषये वर्णनं विद्यते। नवयोगेश्वराणां चरित्रवर्णनमस्य अध्यायस्य महन्महत्त्वं प्रतिपादयति। राजा निमि: यज्ञकाले तान् सर्वान् ददर्श। तान् एकैकान् विविधान् प्रश्नान् पप्रच्छ। तस्य निमे: प्रश्नानुगुणं नवयोगेश्वरै: भगवत: स्वरूपादीनां भगवत्प्राप्ते: विविधानि लक्षणानि च प्रोक्तानि विद्यन्ते। एते च सर्वेऽपि विषया: भिन्न भिन्नविषयानुगुणं प्रतिपादितं विद्यते।

# आदर्शप्रश्ना:

**लघूत्तरीयप्रश्ना:**

१. निमे: जगद्विषयक: प्रश्न:।

२. भगवत्प्राप्तिनिमित्तं वसुदेवस्य प्रश्न:।

३. योगेश्वराणामुत्पत्ति:।

**विश्लेषणात्मकप्रश्ना:**

१. चतुर्थयोगेश्वरस्य प्रवृद्धस्य सम्वादं वर्णयत।

२. ब्राह्मणानां शापं विशदयत।

३. अन्तरिक्षस्य मायाविषयकं वर्णनं प्रतिपादयत।

**निबन्धात्मकप्रश्ना:**

१. नारदवसुदेवयो: सम्वादं स्पष्टयत।

२. निम्युपाख्यानस्य भगवत्प्राप्तिदृष्ट्या स्वरूपं विवेचयत।

**एकाङ्कप्रश्ना:**

१. राजा निमि: कुत्र योगेश्वरान् ददर्श ?

२. तृतीय: योगेश्वर: क: ?

३. वसुदेवस्य गृहं प्रति क: समायात: ?

४. ऋषभदेवस्य कति पुत्रा: आसन् ?

५. भगवत: शक्ति का विद्यते ?

६. क: गर्भवती अस्ति इति यदवपुत्रा: प्राहु: ?

७. समुद्रे मुसलखण्डं कः अखादत् ?

८. मुसलेन केषां संहारः अभूत् ?

९. योगेश्वरः कः ?

१०. अहंकारः कुतो जायते ?

११. कः सर्वान् पापान् नाशयितुं समर्थो विद्यते ?

१२. प्रबृद्धः कः ?

**उत्तराणि**

१. यज्ञस्थले २. अन्तरिक्षः ३. नारदः ४. १०० ५. माया ६. साम्वं

७. मत्स्यः ८.यादवानां ९. श्रीकृष्णः १०. महत्तः ११. श्रीकृष्णः १२. ऋषभदेवस्य पुत्रः

# द्वितीयोऽध्याय:

**प्रस्तावना –**

पूर्वऽस्मिन् अध्याये भगवद्भक्तस्य विविधानि लक्षणानि तथा भगवत्प्राप्ते: विविधा: मार्गा: प्रोक्ता: विद्यन्ते। अस्मिन् अध्याये निमे: प्रश्नस्य उत्तरं दातुं सर्वे प्रयतन्ते। भगवत: नारायणस्य विविधानि स्वरूपाणि अत्र चर्च्यन्ते। अस्य अध्यायस्य पठनेन भगवद्भक्तिभावं सर्वदा मनसि आगच्छति। पुन: संसारे अहर्निशं मायामोहे न प्रपीडिता: सन्त: जना: भगवत: शरणं प्रति गच्छन्ति। परन्तु ये च केचन भक्तिहीना: पुरुषा: विद्यन्ते तेषां गतिविषये अवबोधिष्यन्ति। ब्राह्मणानां शापस्य प्रभावं कथं भगवान् अपि भुंक्ते तदत्र प्रतिपाद्यते।

**उद्देश्यम्**

अस्मिन् अध्याये सर्वेऽपि इमान् अधोनिर्दिष्टान् विषयान् वेत्स्यन्ति।

- **भगवत: नारायणस्य स्वरूपम्**
- **कर्मयोगस्य वर्णनम्**
- **भगवत: अवताराणां वर्णनम्**
- **भक्तिहीनपुरुषाणां गति: तथा भगवत: पूजाविधानम्**
- **भगवत: स्वरूपवर्णनम्**
- **स्वधाम प्रति गन्तुं देवानां स्तुति:**
- **यादवानां प्रभासक्षेत्रं प्रति गमनम्**

**भगवतः नारायणस्य स्वरूपम्**

निमिः भगवतः अचिन्त्यरूपं ज्ञात्वा अपि योगीश्रेष्ठान् भगवतः नारयणस्य स्वरूपं पप्रच्छ। तस्य नारयणस्य स्वरूपचिन्तनेन मानवस्य किं भवति? अस्य प्रश्नस्य उत्तरं साक्षात् योगेश्वरः पिप्पलायनः प्राह। यः समेषां सृष्टिस्थितिप्रलयानां कारणभूतः सर्वभूतनिवासी परमयोगेश्वरः जाग्रतस्वप्नसुषुप्त्यादीनां साक्षीभूतः सञ्जीवितानां सर्वेषां भूतानामात्मस्वरूपः भवति नारायणः। यथा अग्नितः उत्पद्यमानः स्फुलिङ्गः अग्नेः प्रकाशं कर्तुं न शक्नोति तथा परमात्मा सर्वेषु शरीरेन्दियबद्ध्यादिषु स्थितेष्वपि अव्यक्तरूपेण प्रतिष्ठति। मूलरूपेण वेदानां स्वरूपभूतस्य परमात्मनः न कश्चित् वर्णयितुं सक्षमो विद्यते। आदौ सृष्टेः एकमात्रं ब्रह्म भवति। तस्मात् गुणत्रणरूपी मूलप्रकृति उद्भवति। प्रकृतौ आलोडनं भूत्वा महत्तः उत्पत्तिः भवति। ततः अहङ्कारः, अहङ्कारात् इन्द्रियाणां प्राणानामुत्पत्तिः जायते। जीवरूपेणापि सर्वेषु तत्त्वेषु परमात्मनः स्थितिः भवत्येव। आत्मारूपेण सर्वेषु जीवेषु तिष्ठति परमात्मा। तस्य आत्मनः कदाचिदपि मृत्युः न भवति न जायते च। सकलानां भूतभविष्यवर्तमानस्य साक्षीस्वरूपेण तिष्ठति। यथा प्राणाः एकत्वेनापि विविधेषु स्थानभेदेषु विविधरूपेण प्रतिभान्ति तथा भगवान् एकत्वेनापि जीवगतेषु विविधेषु स्थलेषु भिन्न भिन्नरूपेण तिष्ठति। आत्मसत्ता निर्विकाररूपेण स्वतः चलति। तदर्थं निद्रायामुत्थिते सति साक्षात् अहं निद्रायामासमिति ज्ञायते। भगवतः सत्ता आत्मसाक्षात्कारमाध्यमेन अनुभूयते। श्रवनमनननिधिध्यासनमाध्यमेन आत्मनः सत्ता गृह्यते। एकाग्रचित्तेन आत्मसाक्षात्कारेण मलविक्षेपाद्यावरणगतदोषानां निवृत्तिः भवति।

बोधप्रश्नः

१. पिप्पलायनः कः?

२. त्रिगुणात्मिका का?

**कर्मयोगस्य वर्णनम्**

राजर्षि: निमि: प्रसङ्गवशत: कर्मयोगस्य स्वरूपं पप्रच्छ। केन प्रकारेण अस्मिन् संसारे मानव: अनासक्त: भविष्यति। कर्मयोगस्य माध्यमेन कथं सर्वं साधयितुं शक्यते इति ज्ञातुं निमे: अभिलाषा जाता। तत: षष्ठयोगेश्वर: आविर्होत्र: विषयानुगुणं सर्वाणि रहस्यानि प्रोवाच।

कर्माकर्मविकर्मचेति त्रिविधानि कर्माणि वर्तन्ते। एतानि कर्माणि वेदक्तानि भवन्ति, अत: सर्वेऽपि मुनय: तं वेदं प्रति मुह्यन्ति। यथा वालेभ्य: औषधं मधुरमध्ये स्थापयित्वा दीयते तथैव परोक्षवादस्य वेदस्य ग्रहणं सर्वै कर्त्तव्यं भवति। वेदोक्तानि कर्माणि अनुष्ठानेन मनुष्य: कर्मवन्धनात् प्रमुच्यते। अज्ञानी वेदे प्रयोजनमुद्दिश्य यानि कार्याणि वर्णितानि सन्ति तानि न आचरणं कृत्वा पापभाक् भवति। अनासक्तरूपेण वैदिककर्माणि अनुष्ठापयितव्यानि भवन्ति। अनासक्तरूपेण कार्यं कृत्वा मानव: इहलोके परलोके च सुखेन तिष्ठति। आचार्येभ्य: अनुगृहीत: छात्र: सर्वादौ दीक्षादीनां ग्रहणं कृत्वा उपासनविधिं गृह्णीयात्। स्नानाद्याचरणं कृत्वा बाह्यकरणस्य शुचिं कृत्वा उपासनायाम् अन्त:करणस्य शुद्धिं कारयेत्।

उपासक: स्वस्य देवस्य हृदयादीनां विविधानामङ्गानां चिन्तनं कृत्वा विविधपूजामाध्यमेन विधिवत् अनुष्ठानं कारयेत्।

**बोधप्रश्न:**

१. कर्माणि कतिविधानि सन्ति ?

२. उपासनाविधि: कस्माद् शिक्षणीयो भवति ?

**भगवत: अवताराणां वर्णनम्**

नवयोगेश्वरेषु द्रुमिल: अन्यतम:। स: भगवत: विविधानामवतारानां वर्णनं विदधाति। भगवान् अनन्त: तस्य भगवत: गुणा: अपि अनन्ता, न कोऽपि तस्य लीलां वर्णयितुं समर्थो विद्यते। यथा भूमे: रजांसि न कोऽपि गणयितुं सक्षमो विद्यते, तथा अचिन्त्यपरमात्मन: न कोऽपि गुणान् वर्णयितुं शक्यते। पृथिवीजलवायुतेजाकाशादीनामुत्पत्ति: भगवत: मायाशक्त्या एव भवति। अन्तर्यामीरूपेण सर्वेषु स: विद्यमानो वर्तते। त्रिभुवनं भगवत: शरीरमेव। तस्य अपारकरुणया एव सर्वेषां शारीरिकमानसिकक्रियात्मकशक्तिरुत्पद्यते।

स: अचिन्त्य: पराशक्तिमान् भगवान् सर्वादौ रजोगुणमय: ब्रह्मारूपेण, सर्वेषां जनानां यज्ञकर्तृणां ब्राह्मणानां पालनकर्ता विष्णुरूपेण, तमोगुणमय: संहारकाले रुद्ररूपेण आविर्भवति। धर्मस्य पत्नी मूर्त्ति दक्षप्रजापते: कन्या आसीत्। तस्या: गर्भात् नरनारायणरूपेण अवततार। तस्मिन् अवतारे भगवता आत्मतत्त्वस्य साक्षात्कारनिमित्तं विविधानि कर्माणि प्रोक्तानि। कर्मणा सर्वे मयामोहात्मकात् संसारवन्धनात् प्रमुच्यन्ते। कदाचित् इन्द्र: मम धाम जिघृक्षतीति विशङ्क्य नरनारायणस्य तपस्यायां विघ्नं कर्तुं कामदेवं वदरिकाश्रमं प्रति प्रेषयामास। कामदेव: वसन्तसमये मन्दसुगन्धवायुमाध्यमेन अप्सरसां सहायेन तपस्यायां विघ्नं कर्तुं चेष्टां चकार। नरनारायणौ विस्मितस्तथाक्रोधित: न भूत्वा तेषामातिथ्यं सेवां च अकरोत्। एतत् दृष्ट्वा कामदेव: अत्यन्त: लज्जितो बभूव। ते सर्वे प्रोचु:। हे भगवन्! सर्वे धीरपुरुषा: सज्जना: निरन्तरं भवत: चरणकमलयो: ध्यानं कुर्वन्ति। एतादृशं कथनं अस्माकं कृते अतीव ग्लानिदायकं भवति। भक्तानां रक्षक: भवान् संसारस्य समेषां जनानां प्राणदायकश्च भवति। तदर्थं भवत: ये शरणापन्ना: भवन्ति तेषां कदाचिदपि दु:खं न भवति।

ततः श्रीकृष्णः अत्यद्भुतदर्शनाः कन्याः प्रकटयामास। ताः सर्वाः अपि कन्याः रूपलावण्येन कामदेवेन सह याः स्त्रियः आगताः आसन्, ताभ्यः सौन्दर्यवत्यः आसन्। एताः दृष्ट्वा सर्वे लज्जिताः अन्वभवन्। ततः श्रीकृष्णः तान् प्रति उवाच, हे कामदेव! एतासु या रोचते तुभ्यं तां स्वीकृत्य गच्छ। तत्र सर्वाः अपि सौन्दर्यवत्यः आसन्। स्वर्गलोकस्य शोभावर्धनार्थं सर्वे इन्द्रस्य अनुचराः उर्वशीं स्वीकृत्य तस्मात् स्थानात् ययुः। कामदेवः कन्दर्पः एतान् सर्वान् विषयान् गत्वा इन्द्रस्य समीपे कथयामास। नरनारायणस्य वलं तथा प्रभावं श्रुत्वा सर्वे चकिताः अभूवन्। इन्द्रादिदेवाः सर्वे विस्मिताः बभूबुः। सः भगवान् नारायणः साक्षादेव विविधान् अवतारान् स्वीकृत्य जगतः मङ्गलकामनां चकार। तस्य देवस्य विविधाः अंशावताराः विद्यन्ते। सः नारायणः हंसरूपं गृहीत्वा आत्मयोगस्य उपदेशं ददौ। दत्तात्रेयसनत्कुमारस्तथा ऋषभदेवरूपेण आत्मयोगस्य व्याख्यानं कृतवान्। नारायणः एव हयग्रीवस्य रूपं धृत्वा मधुकैटभादीनामसुराणां संहारं कृत्वा देवानामुद्धारं चकार। प्रलयकाले मत्स्यावतारं स्वीकृत्य सत्यव्रतमन्वादिभिः सह पृथिव्याः उद्धारं कृतवान्। वराहावतारं नीत्वा हिरण्याक्षस्य वधमकरोत्। रसातले स्थितायाः पृथिव्याः उद्धारमपि कृतवान्। कूर्मावतारं स्वीकृत्य मन्दराचलपर्वतस्य अधोभागे स्थित्वा समुद्रमन्थने सहायको बभूव। गजेन्द्रस्य अपि उद्धारं चकार।

कदाचित् वालखिल्यादयः सर्वेऽपि ऋषयः तपस्यां कृत्वा अत्यन्त दुर्वलाः अभूवन्। ते सर्वेऽपि कश्यपमहर्षेः निमित्तं समिधानयनसमये कस्मिंश्चित् गर्त्ते पतिताः आसन्। तत् समुद्रे पतिताः इव चिन्तयामास। तान् सर्वान् ऋषीन् भगवान् उद्धारयामास। वृत्रासुरस्य हननं हेतोः इन्द्रस्य पृष्ठतः ब्रह्महत्यादोषः अनुधावितः। सः भयेन कुत्रचित् प्रविष्टः आसीत्। तदानीं भगवान् तमिन्द्रं तस्मात् पापात् रक्षयामास। देवस्त्रियः असुरस्य हिरण्यकशिपोः गृहे पिहिताः आसन्। तदानीं प्रभुः नरसिंहरूपेण ताः रक्षयामास। प्रह्लादादीन् बहून् जनान् अभयं कारयामास। देवानां रक्षणार्थं दैवासुरसंग्रामे दैत्यानां वधं

चकार। मन्वन्तरे विविधान् अंशवतारान् गृहीत्वा त्रिभुवनस्य रक्षणं कृतवान्। वामनावतारे छलेन वले: समग्रसंसारस्य उद्धारमकार्षीत्। भृगुपतिपर्शुराम्स्हैहयकुलस्य नाधनिमित्तं अग्निस्वरूपं भूत्वा सर्वान् उद्धारयामास। रामावतारे समुद्रे सेतुं संस्थाप्य लङ्कापुरं दहनं कृत्वा रावणमहनत्। पुन: अजन्मा अपि सन् भगवान् पृथिव्यां यादवकुले जन्म नीत्वा सर्वान् पापीन् हनिष्यति। कलियुगे कल्क्यवतारं स्वीकृत्य शुद्रनृपादीनां संहारं करिष्यति। अत: हे विदेहराज! भगवत: अवतारा: अनेके सन्ति। मुख्यरूपेण ये अवतारा: प्रथिता: ते मया प्रोक्ता: वर्तन्ते।

बोधप्रश्न:

१. वराहावतारे कं भगवान् हतवान्?

२. के ऋषय: तप: समाचर्य दुर्वला: अभूवन्?

३. रामावतारं कस्मिन् युगे भगवान् धृतवान्?

**भक्तिहीनपुरुषाणां गति: तथा भगवत: पूजाविधानम्**

येषां जनानां चित्तं विषयभोगं प्रति सदासर्वदा लालायिता भवति, कदाचिदपि धर्माचरणं नाकुर्वन्, तेषां का गति: भविष्यति, तथा आत्मवित्तमा: केवलं भगवन्तं भजन्ति इति प्राक् सर्वे जानन्ति। परन्तु ये अशान्तकामाश्च भवन्ति तेषां का गतिर्भविष्यति इति प्रश्नस्य समाधानमष्टमयोगेश्वर: चमस: प्रोक्तवान्। विराट्पुरुषस्य मुखवाहूरुपादेभ्य: सर्वे वर्णा: जज्ञिरे। चत्वार: आश्रमा: विप्रक्षत्रियवैश्यशूद्रादय: चत्वार: वर्णाश्च जज्ञिरे। भगवत: मुखात् सत्त्वप्रधानसंपन्नब्राह्मणा:, बाहो: सत्त्वरजोपेता: क्षत्रिया, जानुत: वैश्या: पद्भ्यां शूद्रा: अजायन्त। क्रमश: अपि ब्रह्मचर्यगृहस्थवानप्रस्थसन्न्यासादय: चत्वार: आश्रमा: समुद्भुता:।

एतेषु चतुर्षु वर्णेषु ये जनाः पितारूपी परमात्मनः अनादरं कुर्वन्ति तं न ध्यायन्ति तेषां गतिः अगतिर्भवति। स्थानभ्रष्टाः सन् नीच्चस्थानं प्राप्नुवन्ति। स्त्रीशूद्रादयः वर्णाः भगवतः कृपायाः पात्रं भवन्ति। भगवतः नाम श्रवणं सङ्कीर्त्तनमाध्यमेन तेषां गतिः जायते। ब्राह्मणक्षत्रियौ द्वावपि किञ्चिदुन्नतत्वात् भगवत्सन्निधिनिमित्तं विशेषयोग्याः भवन्ति। एतेषु केचन अज्ञानकारणवशतः विविधानां सकामकर्मणामनुष्ठानं कृत्वा अधोगतिं यान्ति। कर्मणः रहस्यं ते न जानन्ति परन्तु अत्यधिकमूढतावशतः नष्टाः भवन्ति। रजोगुणे सम्पृक्ताः जनाः विविधेषु प्रमत्तेषु कार्येषु उन्मत्ताः भवन्ति। स्त्रीलोलुपिनः सर्वेऽपि गृहे कलहे निमग्नाः भवन्ति। स्वस्य जीवननिर्वाहार्थं पश्वादीनां वधं कृत्वा भोजनरूपेण प्रस्तुवन्ति। विधिपूर्वकयज्ञादीनामनुष्ठानं न कुर्वन्ति। दुष्टाः विद्यासौन्दर्यधनवलैः गर्वीताः अनुभवन्ति। भगवतः परमप्रियानां सज्जनानां निन्दां कृत्वा तेषां मनसि शान्तिरागच्छति। आकाशः यथा सर्वत्र परिव्याप्तो वर्तते तथा देवाः अपि सन्ति परन्तु मूर्खाः एतेषां निन्दां कुर्वन्ति।

सर्वे जीवाः मैथुनमांसमद्यपानं प्रति अतिसहजेन प्रवृत्ताः भवन्ति। एतत् त्रयमपि पतनस्य कारणं भवति। शास्त्रादिषु यत् विधानं विहितं वर्तते तदनुसारं प्रवृत्तिः भवेत्। धनस्य विनियोगः एव धनस्य श्रेष्ठोपयोगः। धनात् धर्मः, तथा धर्मात् अशेषशान्तिः लभ्यते। सौत्रामण्यादिषु यागेषु सुरायाः आघ्राणस्य विधानं विहितं वर्तते, यज्ञे पशुसंज्ञपने पशोः स्पर्शस्य विधानं विहितं वर्तते न तदन्यथा श्रूयते। सन्ततिनिमित्तं मैथुनस्य आवश्यकता वर्तते, संभोगार्थं न विद्यते। अविद्यासम्पन्नपुरुषाणामधोगतिः भवति। एतेषां गमनं मरणानन्तरं नरकं प्रति भवति। प्रत्येकऽस्मिन् समये दुःखेन एते सर्वे प्रपीडिताः भवन्ति।

बोधप्रश्न:

१. सर्वे वर्णा: कस्माद् जज्ञिरे ?

२. के जना: नरके पतन्ति ?

३. के जना: भगवन्तं नाराधयन्ति ?

**भगवत: स्वरूपवर्णनम्**

नवमयोगेश्वर: करभाजन: भगवत: रूपस्य तथा आकृते: विषये वर्णनं चकार। चतुर्षु युगेषु भगवत: विविधयुगे विविधावतारं भवति। समयानुगुणं भगवत: रूपस्य अद्भुतचित्रणं शास्त्रेषु प्रतिपाद्यते। सत्ययुगे भगवत: वर्ण: श्वेत: आसीत्। चतुर्भुजमूर्त्तिमान् जटावल्कलवस्त्रं परिधृत्वा कृष्णमुर्गचर्मयज्ञोपवीतरुद्राक्षमालादण्डकमण्डल्वादि विविधानि आयूधानि भगवत: आसीत्। सत्ययुगे मानवा: अपि वैररहिता: हितैषिण: समदर्शिन: आसन्। इन्द्रियाणि संयम्य तपसा अनुरक्ता: आसन्। भगवत: हंससुपर्णवैकुण्ठधर्मयोगेश्वरामलेश्वरपुरुषाव्यक्तपरमात्मादीनि नामानि आसन्। परन्तु त्रेतयायुगे भगवत: श्रीविग्रह: रक्तवर्ण: आसीत्। कटिभागे तस्य मेखलात्रयमासीत्। तस्मिन् समये जना: अपि निष्ठावन्त: वेदादिषु अध्ययनरता: अध्यापने प्रवीणा: आसन्। त्रेतयायुगे जना: भगवत: विविधानि नामानि कीर्तनं चक्रु:, यथा विष्णु:,यज्ञ:, पृश्निगर्भ:, सर्ववेद:, उरुक्रम:, वृषाकपि:, जयन्त:, उरुगायश्च। द्वापरयुगे भगवत: शरीरस्य वर्ण: श्यामल: आसीत्। स: पिताम्बरं परिधृत्वा शङ्खचक्रगदायूधानि च दधार। भगवत: वक्षस्थले श्रीवत्सचिह्न भृगुलाञ्छन, कौस्तुभमणि: इत्यादीनि विविधानि लक्षणानि आसन्। वासुदेवसङ्कर्षणादि नामानि भगवत: आसन्। जना: भगवत्परायणा: जिज्ञासव: तथा केचन रजोगुणयुक्ता: अत्यन्तधूर्ता: आसन्। विश्वरूपसर्वभूतात्माविश्वेश्वरादीनि नामानि धृत्वा सर्वे जयकारं कृतवन्त:। कलियुगे भगवत: वर्ण: कृष्ण:। परन्तु अस्मिन् युगे भगवत: कान्ति:

अतीव मनोहरः भवति। कौस्तुभादि अलङ्कारान् धृत्वा विविधानि अस्त्राणि च हस्ते धृत्वा पार्षदानां मध्ये तिष्ठन्ति। शिवादयः सर्वे देवाः अस्य देवस्य विष्णोः पादयुगलं सदासर्वदा चिन्तयन्ति। एवं रूपेण विविधेषु युगेषु भगवतः विविधाः वर्णाः आयूधानि च सन्ति।

बोधप्रश्नः

१. कस्मिन् युगे भगवतः शरीरस्य वर्णः रक्तः आसीत् ?

२. के भगवतः पादयुगलं सर्वदा चिन्तयन्ति ?

३. त्रेतयायुगे भगवतः कानि नामानि धृत्वा सर्वे कीर्त्तनं चक्रुः ?

**स्वधाम प्रति गन्तुं देवानां स्तुतिः**

कदाचित् सर्वे देवाः भगवतः श्रीकृष्णस्य दर्शननिमित्तं द्वारकां प्रति समाजग्मुः। तेषु देवेषु ब्रह्मा सनकादयः शिवः, मरुद्गणाः, द्वादशादित्याः, ऋषयः, अष्टवसवः, नागाः सिद्धाः, गन्धर्वाः, चारणाः, पितृगणाः, अप्सरसः, किन्नराः, अश्विनीकुमारौ, इन्द्रादयः सर्वेऽपि आसन्। भगवतः सुन्दरश्यामलरूपं दृष्ट्वा सर्वे प्रसन्नाः अभूवन्। सर्वे मिलित्वा भगवतः विविधास्तुतिं चक्रुः। द्वारकापुरी सकलप्रकारस्य समृद्धस्य शोभासम्पन्नस्य स्थली आसीत्। तत्र श्रीकृष्णस्य रूपमाधुर्यं दृष्ट्वा मुखरिताः भूत्वा गतवन्तः। तत्र देवाः भगवतः विविधप्रकारेण स्तुतिं कृत्वा अनृत्यन्। भगवतः गुणकीर्तनं यः प्रत्यहं शृणोति तस्य सकलं पापं नाशं भवति। अखण्डानन्दं लब्ध्वा सः परमपदं प्राप्नोति। सर्वे ब्राह्मणाः वेदोक्तान् मन्त्रान् पठित्वा भगवतः चिन्तनं कृत्वा पदयुगले मनोनिवेशं कुर्वन्ति। भक्तः यत् किमपि भगवते समर्पयति तत् सर्वं भवान् भुङ्क्ते। साधुजनानां भावनायाः आवेगस्वरूपेण अवतीर्णः भवान्। नस्योतगाव इव यथा वशे भवन्ति तथा सर्वे ब्रह्मादयः भवतः अनुगुणं कार्यं साधयन्ति। कालप्रकृतिपुरुषादयः भवतः चरणानुरागिणः भूत्वा कार्यं सम्पादयन्ति। जगतः सृष्टिस्थितिप्रलयानां कारणरूपेण भवान् एव विद्यमानो

दृश्यते। मयामयस्य जगतः कारणरूपेण भवान् सर्वान् सर्वं वितनोति। विविधेषु विषयेषु स्थित्वाऽपि विषयभोगं न कृत्वा आनन्देन तिष्ठति। ब्रह्मा सदासर्वदा भवतः चरणयुगलयोः वन्दना करोति। एवं वन्दनां कृत्वा ब्रह्मा प्रोवाच हे भगवन् पृथिव्याः भारं लाघवं कर्तुं वयं भवन्तं प्रार्थितवन्तः । सर्वाणि च कार्याणि विधिवत् भवता सम्पादितानि वर्तन्ते। भवतः लीला अगम्या। साधवः सर्वे भवतः श्रवणं चिन्तनं कृत्वा जीवनं निर्वहन्ति। यदुवंशे भवतः पञ्चविंशत्याधिकमेकशतवर्षाणि व्यतीतानि जातानि। ब्राह्मणानां शापकारणतः यादवानामपि कुलस्य संहारः भवति। यदि इदानीं समयः समुचितः मन्यते चेत् स्वस्य परमधाम प्रति प्रत्यागम्यताम्। ततः भगवान् श्रीकृष्णः यादवानां वलविक्रमयोः संहारं कृत्वा पृथिव्याः भारं लाघवं करिष्यामि। इदानीं यादवानां विनाशः उपागतः। समेषाविनाशानन्तरं वैकुण्ठं प्रति अहं प्रतिगच्छामि। ब्रह्मादि देवगणाः सर्वे एवं श्रुत्वा स्वस्य धाम प्रति जग्मतुः।

बोधप्रश्नः

१. ब्रह्मादयः सर्वे कस्य स्तुतिं चक्रुः ?

२. साधून् कः रक्षति ?

**यादवानां प्रभासक्षेत्रं प्रति गमनम् -**

ब्रह्मादिदेवाः यदा स्वलोकं प्रति प्रस्थिताः तदानीं द्वारकायां सर्वे यादववृद्धाः श्रीकृष्णं प्रति आगताः। समुत्थितान् महोत्पातान् विलोक्य सर्वान् आगतान् वृद्धान् भगवान् प्रबोधयामास। सर्वतः एते महोत्पाताः व्युतिष्ठन्ति। अयं शापः कैश्चित् ब्राह्मणैः वयं प्राप्ताः। चिरं यावत् अत्र न स्थातव्यं भवति। अतः इतः प्रस्थानं कर्तव्यं सुमहत्पुण्यप्रदं भविष्यति। अद्यैव प्रभासक्षेत्रं प्रति वयं सर्वे गच्छामः। अस्य प्रभासक्षेत्रस्य महत्त्वमति प्रसिद्धम्। दक्षप्रजापतेः शापवशात् चन्द्रमसः राजयक्ष्माव्याधिः बभूव। परन्तुं

सः प्रभासक्षेत्रं प्रत्यागत्य स्नानं चकार। एतस्मात् रोगात् प्रमुच्य तस्य कलोदयमपि अभूत्। वयमपि तत्र गत्वा स्नानं समाप्य पितृन् देवान् च तर्पयित्वा सुस्वादभोजनस्य निर्माणं च कृत्वा विप्रेभ्यः दद्मः। तेन तस्मात् पापात् कदाचित् मुक्तिः भविष्यति। सर्वे यदा प्रभासक्षेत्रं प्रति गन्तुमुद्यताः आसन् तदानीं श्रीकृष्णस्य परमभक्तः तथा मन्त्री उद्धवः एतत्सर्वमपशकुनं दृष्ट्वा एकान्ते श्रीकृष्णेन सह मिलित्वा मधुरपूर्णभाषणेन अभाषत।

बोधप्रश्नः

१. केभ्यः ब्राह्मणाः शापं ददौ ?

२. यादवाः कुत्र गन्तुं प्रयतन्तः आसन् ?

## सारांश:

निमे: विविधान् प्रश्नान् श्रुत्वा सर्वेऽपि योगेश्वरा: एकैकं उत्तराणि कथयामासु:। भगवत: मायाया: स्वरूपं तथा मायां तर्त्तुं विविधानां उपायानां वर्णनं विहितं वर्त्तते। विशेषतया तृतीयस्य योगेश्वरस्य भगवत्विषयकं चित्रणं वर्ण्यते। भगवत: नारायणस्य स्वरूपं तस्य भगवत: सान्निध्यं प्राप्तिहेतव: तथा तत् साधनार्थं प्रक्ता: नियामा: प्रतिपादिता: सन्ति। षष्ठयोगेश्वरस्य आविर्होत्रस्य निष्कामकर्म तथा कर्मणां स्वरूपं यथा निमे: प्रश्नस्य समाधानं समुपवर्णितं दृश्यते। समेषामुपासकानां भगवत् चिन्तनस्य स्वरूपं विहितं वर्त्तते। भगवत: नारायणस्य विविधानामवतारानां चित्रणं चित्रितं विद्यते। सर्वत्र च भगवत: सत्ताया: वर्णनं पञ्चमहाभूतानामाधारेण सकलाया: सृष्टे: वर्णनं दृश्यते। पुन: अस्मिन् अध्याये भगवत: नरनारायणस्य तपस्या वर्णिता दृश्यते। नरनारायणयो: तपसि विघ्नं सम्पादयितुमिद्रस्य प्ररोचना वर्णिता विद्यते। भगवत: स्वरूपं कामदेवादय: सर्वे दृष्ट्वा चकिता: अभूवन्। किञ्च समेषामातिथ्यं तथा अभिवादनं च श्रूयते।

तत: ब्रह्मादिदेवगणा: सर्वे भगवन्तं श्रीकृष्णं स्वधाम प्रति गमनार्थं स्तुतय: विहिता: वर्त्तन्ते। भगवान् श्रीकृष्ण: तेभ्य: स्वकर्मण: समाप्त्यनन्तरं गमनस्य विषये चित्रणं प्रतिपादितमस्ति। ब्राह्मणानां शापवशात् यादवानां संहारविषये उग्रसेनस्य तथा विविधानां यादवबृद्धानां प्रभासक्षेत्रं प्रति गमनं वर्ण्यते।

## आदर्शप्रश्नाः

**लघूत्तरीयप्रश्नाः**

१. प्रभासक्षेत्रस्य महात्म्यम्।

२. वर्णानामुत्पत्तिः।

३. भगवतः स्वरूपाणि ।

**विश्लेषणात्मकप्रश्नाः**

१. कर्मयोगस्य स्वरूपं वर्णयत।

२. भगवतः पूजाविधिः विशदयत।

३. कर्मणः स्वरूपाणि लिखत।

**निबन्धात्मकप्रश्नाः**

१. ब्रह्मादीनां स्तुतिं वर्णयत।

२. भक्तिहीनपुरुषाणां गतिं स्पष्टयत।

३. भगवतः अवतारान् विशदयत।

**एकाङ्कप्रश्नाः**

१. नवमः योगेश्वरः कः ?

२. कः भगवतः चरणयुगलयोः ध्यानं करोति ?

३. सत्ययुगे भगवतः वर्णः कीदृशः आसीत् ?

४. पृष्णिगर्भः कस्य नाम विद्यते ?

५. चतुर्भुजमूर्त्तिः कस्य विद्यते ?

६. शूद्राः कस्माद् जज्ञिरे ?

७. द्रुमिल: क: ?

८. वक्षस्थले भगवत: किं शोभते ?

९. कलौ भगवत: वर्ण: क: ?

१०. क: चन्द्रमसं शापं ददौ ?

११. द्रुमिल: भगवत: किं वर्णयति ?

१२. यादवा: सर्वे कुत्र जग्मु: ?

**उत्तराणि**

१. करभाजन: २. ब्रह्मा ३. श्वेत: ४. विष्णो: ५. विष्णो: ६. पद्भ्यां

७. योगेश्वर: ८. श्रीवत्सचिह्न ९. कृष्ण: १०. दक्ष: ११. अवतारं १२.प्रभासक्षेत्रं

## तृतीयोऽध्यायः

**प्रस्तावना –**

श्रीमद्भागवतमहापुराणं न केवलमाध्यात्मिकविद्यायाः विचारं प्रस्तौति, अपितु मानवजीवने यानि तत्त्वानि अवश्यं शिक्षणीयानि तानि अत्र प्रतिपाद्यन्ते। विविधानामाख्यायिकानां माध्यमेन सर्वेभ्यः जनेभ्यः सामाजिकेभ्यश्च प्रेरणा दीयते। साक्षात् भगवतः मुखारविन्दात् विविधाः कथाः श्रूयन्ते। तासु कथासु दत्तात्रेयस्य आख्यानं श्रीमद्भागवतस्य साहित्यिकं तथा सौन्दर्यात्मकं मूल्यबोधं प्रस्तौति। उद्धवं प्रति भगवान् श्रीकृष्णः विविधानां विषयाणाम् आख्यानोपाख्यानमाध्यमेन कथयामास। उद्धवः अपि प्रश्नोपप्रश्नमाध्यमेन सकलानि रहस्यानि भगवतः सकाशात् अवगच्छति स्म। भगवान् अपि तमुद्धवं अनासक्तरूपेण कार्यं विधातु प्रेरयामास। कदाचित् दत्तात्रेयस्य प्रसङ्गवशात् उदाहरणं श्रीकृष्णेन प्रदत्तम्। तस्य दत्तात्रेयस्य चतुर्विंशतिगुरुणां विषये अधः चर्चा विधीयते। समेषां गुरुणां नामानि तथा कस्मात् किं किं अधीतानि तानि सर्वाणि प्रस्तूयन्ते। तानि लोककल्याणाय अपि सुतरां भविष्यति।

**उद्देश्यानि –**

अस्मिन् अध्याये सर्वेऽपि पाठकाः अधोदर्शितान् अंशान् पठिष्यन्ति।

- **श्रीकृष्णोद्धवसम्वादः**
- **यदुदत्तात्रेयसम्वादः**
- **पृथिवीतः आरभ्य कपोतं यावत् अष्टौ गुरवः**
- **अजगरादारभ्य पिङ्गलां यावत् नवगुरवः**
- **कुररात् भृङ्गीं यावत् नवगुरवः**

**श्रीकृष्णोद्धवसम्वाद:**

एकान्तचित्तेन भगवत: समीपं गत्वा भक्ताग्रगण्य: उद्धव: स्वीयमनस: भावान् प्रतिपादयामास। परमशक्तिमान् श्रीकृष्ण: ब्राह्मणानां शापमपि प्रत्यहन् समर्थो भवति, परन्तु तथा न कृत्वा विनाशोन्मुखीं कारयति। तदर्थमेव ज्ञायते इदानीं भगवत: परमधाम प्रति गमनस्य समय: आगत:। उद्धव: भगवत: पदयुगलं त्यक्त्वा क्षणार्द्धमपि गन्तुं न इयेष। तत: प्राह हे भगवन्! भवत: लीला समेषां कृते पुण्यप्रदा भवति। य: तस्य रसस्य आस्वादनं करोति तस्य जीवनं धन्यं भवति। शय्यासनाटनस्थानस्नान-क्रीडाशनादिषु भवता सह वयं भक्त्या आस्म इदानीं कथं त्यजेमहि। बहव: ऋषय: ध्यानमाध्यमेन आजीवनं श्रमं कृत्वा भवत: परमपदं प्राप्तुं न शक्नुवन्ति, परन्तु मनाक् अपि श्रमं न कृत्वा भवत: दर्शनमस्माकं कृते सुलभमभवत् तर्हि कथं वयं त्यजेमहि। संसारस्य सकलवासनां त्यक्त्वा जना: भगवदाराधनं कृत्वा भवत: परमपदं प्राप्नुवन्ति। एतादृशानि वाक्यानि श्रुत्वा भगवान् उद्धवमपि बहु प्रकारेण प्रबोधयामास।

ब्रह्मादय: लोकपाला: सर्वे प्रतीक्षारता: सन्ति, लोककल्याणार्थं यावन्ति कार्याणि मम आसन् तानि सर्वाणि समाप्तानि सन्ति अत: मया स्व धाम प्रति गन्तव्यं भवति। ब्राह्मणानां शापे यदुकुलं भस्मं भविष्यति। सप्तदिनानन्तरं समुद्र: द्वारकां प्लावयिष्यति। मम गमनानन्तरं द्वापरयुगस्य अवसानं भविष्यति तत: कलियुग: आगत्य सर्वान् ग्रासिष्यति। कलियुगे जनानाम् रुचि: अधर्मे भविष्यति। आत्मीयजनेषु मोहं परित्यज्य स्वच्छन्दे पृथिव्यां व्रजतु। अनेन परमशान्ति: लभ्यते। ज्ञानविज्ञानसंयुक्त: सन् आत्मभूतानि तत्त्वानि पश्य, आत्मानुभवी भूत्वा सुखदु:खं परित्यज्य विचरणं कुरु। विघ्नेषु अपि विचलनं न भूयात्। गुणदोषादिषु सम्पूर्णरूपेण विच्युत: भव। परमहंस: इव परमात्मनि लीनो भूत्वा निर्विकारे सकलेषु जीवेषु आत्मभूतं पश्य। एतच्छ्रुत्वा उद्धव: तत्त्वज्ञानप्राप्तये श्रेयमार्गस्य उपदेशनिमित्तं

कः उपायः श्रेयस्करः इति पप्रच्छ। संसारस्य कामनां परित्यज्य विषयेषु मनः न निवेष्टव्यम्। मायामोहसंसारे बन्धुवर्गान् प्रति मम मनसि अपार कामना भवति। कथमेतस्मात् तर्त्तुं शक्नोमीति अपि उद्धवः पप्रच्छ। ये जनाः संसारस्य वास्तविकस्वरूपं ज्ञातुं समर्थाः भवन्ति ते बुद्धिमन्तः भवन्ति। तस्य जनस्य आत्मा एव गुरुः आत्मैव सर्वं भवति। ये सांख्ययोगविशेषज्ञाः भवन्ति ते सर्वे अस्य सकलस्य रहस्यस्य विषये जानन्ति। प्रत्यक्षस्तथानुमानमाध्यमेन जनाः स्वस्य सत्तां परिपश्यन्ति। सर्वव्यापकनिर्गुणनिराकाररूपेण आत्मसाक्षात्कारं कृत्वा संसारात् प्रमुच्यन्ते। बहव्यः एकद्वित्रिचतुष्पादो बहुपादस्तथापदः सृष्टाः सन्ति परन्तु तेषु मे पौरुषी प्रिया भवति। मां विविधेन प्रमाणेन कश्चित् अनुमातुं शक्नोति। अनेन प्रकारेण ज्ञानकर्मसन्न्यासमाध्यमेन कश्चित् परमपदं प्राप्तुं शक्नोति।

बोधप्रश्नः

१. ब्रह्मादिलोकपालाः कस्य कृते प्रतीक्षारताः भवन्ति ?

२. उद्धवः कः आसीत् ?

३. कीदृशानि कर्माणि कर्त्तव्यानि इति भगवान् श्रीकृष्णः प्राह ?

**यदुदत्तात्रेयसम्वादः**

कदाचित् प्रसन्नमनसा यदुः ददर्श यत् कश्चित् अवधूतः स्वच्छन्देन विचरति। तमाहूय किं कारणमिति पप्रच्छ। किमपि कर्म न कृत्वा कथं भुङ्क्ते ? पुनः अवोधबालकवत् पृथिव्यां विचरति ? अस्मिन् संसारे अनासक्तः सन् सर्वदा वने पुरे विहरति, कामरूपी भावना भवतः मनसि कथं नायाति ? मानवाः धर्मार्थकाममोक्षेषु कुत्रचिदपि कामनाहेतुकः सन् विवित्सायां समीहन्ते। यदुः अत्यन्तविनम्रतया सह भगवन्तं दत्तात्रेयं पप्रच्छ। दत्तात्रेयः स्वस्य विषये तदानीम् अभाषत। तस्य दत्तात्रेयस्य चतुर्विंशतिः

गुरवः आसन् इति लोके प्रथितो जातः। ते च भवन्ति पृथिवी, वायुः, आकाशः, जलम्, अग्निः, चन्द्रमा, रविः, कपोतः, अजगरः , सिन्धुः, पतङ्गः, मधुकृद्, गजः, मधुहा, हरिणः, मीनः, पिङ्गला, कुररोऽर्भकः, कुमारी, शरकृत्, सर्पः, उर्ण्णनाभिः सुपेशकृत् च। चतुर्विंशतिगुरुणामाश्रयं स्वीकत्य दत्तात्रेयः तदाचारणं चकार।

| बोधप्रश्नः |
|---|
| १. दत्तात्रेयस्य कति गुरवः आसन्? |
| २. दत्तात्रेयस्य अपरं नाम किम् आसीत्? |
| ३. स्वच्छन्देन कः विहरन् बभूव? |

**पृथिवीतः कपोतं यावत् अष्टौ गुरवः**

दत्तात्रेयस्य पृथिव्यादयः सर्वे चतुर्विंशतिगुरवः प्रागेव प्रोक्ताः आसन्। एतेषां गुरूणां विषये कथ्यते। सर्वादौ दत्तात्रेयस्य प्रथमः गुरुः भवति पृथिवी। पृथिव्याः सकाशात् क्षमागुणं दत्तात्रेयः शिक्षयामास। पुरुषव्याघ्रः तद्वदाचरेत्। सर्वेषु कार्येषु शान्तरूपेण स्थित्वा कदाचिदपि विचलितो न भवेत्। भूतैराक्रम्यमाणोऽपि धीरो दैववशादेव इति अवश्यं चिन्तयेत्। सर्वेषां जीवनं परोपकारार्थमेव इति वृक्षादिषु अपि अशिक्षत्।

मुनयः सर्वदा प्राणवृत्तिनिमित्तं यथावश्यकं तथा भुङ्क्त्वा जीवनं यापयेयुः। आहरे यदि संयमः कश्चित् स्थापयेत् तस्य वाणी बुद्धिश्च नावकीर्यते। वायुः यथा सर्वत्र विचरणं करोति परन्तु कुत्रचिदपि

लिप्तो न भवति तथा गुणदोषव्यपेतात्मा न विषज्जेत। गन्धवाहकः वायुः यथा सर्वं गन्धं स्वीकृत्य सर्वत्र व्रजति परन्तु तस्मिन् आसक्तो न भवति तथैव असङ्गः सन् शरीरधर्मात् योगी न युज्येत।

आकाशः यथा सर्वत्र स्थावरजङ्गमादिषु परिव्याप्तो वर्तते, आत्मा तद्वत् सर्वत्र परिव्याप्तो वर्तते। ब्रह्म आत्मारूपेण अन्रर्बहिः सर्वत्र विद्यते। मेघादयः यथा आकाशे व्याप्ताः सन्ति परन्तु तस्मात् आकाशः पृथक् भवति तथैव संसारे योगी सर्वेषु विषयेषु स्थित्वाऽपि आसक्तः न स्यात्।

जलं यथा स्वभावतः स्वच्छनिर्मलतीर्थरूपेण मनुष्यं पूनाति तथैव मुनीनां स्वभावः स्वच्छस्निग्धमाधुर्यादिगुणैः युक्तो भूयेत।

अग्निः यथा सर्वं प्रज्वालनं कृत्वा नाशयति परन्तु कस्मिन् अपि कर्मणि लिप्तो न भवति, तथा साधुजनः स्व तेजसा तपसा च देदीप्यमानो भवेत्। कालस्य गतिप्रभावेन यथा चन्द्रकलायाः क्षतबृद्धिः जायते तथैव अलक्षेन जन्मनः आरभ्य मृत्युं यावत् शरीरं विपरिणमते। अस्य परिवर्तनस्य धारा आत्मना सह न विद्यते। सूर्यः यथाकालं स्वकिरणैः जलमादत्ते तथा विमुञ्चति परन्तु तेषु आसक्तो न भवति तथैव विद्वान् अपि भिन्नेषु विद्यमानेषु आसक्तो न भवेत्। एतस्मात् आत्मनः अखण्डता तथा अभिन्नता ज्ञायते।

प्रसङ्गवशात् अवधूतः कपोतस्य दृष्टान्तं विहितवान्। कदाचित् अरण्ये सुखने कश्चित् कपोतः कपोत्या सह निवसन् आसीत्। द्वावपि अत्यन्त स्नेहेन वृक्षे नीडं कृत्वा निवसतः आस्ताताम्। कालनुगुणं तयोः पक्षीशावकाः जज्ञिरे। लघुशावकैः सह सुखेन वने विहरन्तौ द्वावपि कुत्रचित् आहारान्वेषणार्थं घनारण्यं प्राविवेशतुः। ततः कश्चित् व्याधः आगत्य तान् शावकान् स्वीय जाले बद्धवान्। ततः यदा कपोती आगतवती जाले शावकान् दृष्ट्वा मनसि शावकानां कृते अत्यन्त प्रेमसकाशात् साऽपि जालं प्रति कुदनं कृतवती। ततः यदा कपोतः समागतः, सोऽपि बहुरोदनं कृत्वा जाले निबद्धः जातः। एतत्

सर्वं दृष्ट्वा कदाचित् दत्तात्रेयः चिन्तयामास, गृहस्थानां मोह एव दुःखस्य कारणम्। एतस्य उदाहरणं प्रस्तूय कदाचित् मोहान्मुक्त्यर्थं सः चेष्टयामास।

बोधप्रश्नः

१. पृथिव्याः सकाशात् दत्तात्रेयः अशिक्षत्?

२. कः स्व तेजसा देदीप्यमानः स्यात्?

३. केषां स्वभावः स्वच्छन्दस्निग्धं च वर्त्तते?

४. सांसारिकमोहं त्यक्त्वा कः आकाशवत् सर्वेषु परिव्याप्तो भवेत्?

**अजगरादारभ्य पिङ्गलां यावत् नवगुरवः**

अवधूतः यदुं प्रति अष्टगुरुणां व्याख्यानानन्तरं ततः अजगादीनां गुरुणां विषये प्राह। प्रपञ्चे मानवस्य इच्छां विना सुखं स्वतः आगच्छति, तथा इच्छां विना दुःखं स्वतः गच्छति। तदर्थं कश्चित् विद्वान् जनः सुखेषु उद्विग्नः न भवेत्। दुःखेषु कातरो न भवेत्। यत् किमपि सुमृष्टं विरसं महान्तं स्तोकं वा लभ्यते तत् भुङ्क्वा यदृच्छया अजगरवत् उदासीनो भवेत्। अजगरस्य यथा ओजः सहः तथा वलं सत्त्वेऽपि सः अकर्मकः सन् शेते तथैव योगी यत् किमपि लभ्यते तेन सन्तुष्टः सन् तिष्ठेत्।

योगी समुद्रवत् प्रसन्नस्तथा गम्भीरो भवेत्। देशकालाभ्यां प्रभावितः न सन् कामक्रोधरागद्वेषादिषु विरहितः भूत्वा कदाचिदपि न विचलेत्। यथा विविधानां सरितां जलं लब्ध्वाऽपि न उत्फुल्लितो भवति, तथैव समृद्धकामो हीने वा नारायणपरो मुनिः न उत्सर्पेत।

यथा पतङ्गः मोहग्रस्तो भूत्वा अग्नौ पतति तथा अजितेन्द्रियः जनः देवमायारूपीं कामिनीं दृष्ट्वा कामासक्तः सन् नरके पतति। कामिनीकाञ्चनवस्त्राभूषणादीनि द्रव्याणि मयामोहमयानि सन्ति। अतः विवेकशून्यः जनः तस्मिन् प्रविशति।

माधुकरी यथा पुष्पात् पुष्पं विभ्रम्य स्तोकं स्तोकं मधु संहरति, तथैव योगी अपि यावत् शरीरे देहो वर्तते तावत् स्तोकं स्तोकं ग्रासं ग्रसेत् । भ्रमरः यथा लघुपुष्येभ्यः मधूनि स्वीकरोति तथैव योगी अणुभ्यः महद्भ्श्च शास्त्रेभ्यः सारमादद्यात्। भिक्षितं द्रव्यं सायन्तनं श्वस्तनं वा न संगृह्णीत भिक्षितम्। यतोहि प्रत्यक्षरूपेण दृश्यते यत् मधुमक्षी मधुसंग्रहणं केवलमन्येषां कृते करोति। मक्षिका मधुसंग्रहं कृत्वा तेन सह विनश्यति तदर्थं कदाचिदपि न संगृह्णीत। योगी कदाचिदपि नारीं न स्पृशेत्, पुनः नारी यदि दारवीरूपेण तिष्ठति ततः अपि तस्याः स्पर्शनं न कर्त्तव्यम्। एकः गजः हस्तिनीं प्रति गत्वा अपरेण गजेन विनश्यति तदर्थं प्राज्ञः कदाचिदपि कर्हिचिदपि स्त्रियं नाधिगच्छेत्।

मधुमक्षी महुसञ्चयं कृत्वा यथा अपरस्य कृते सहायमाचरति, तथैव यद् दुःखसञ्चितं द्रव्यं तदपि अन्यः कश्चित् भुङ्क्ते। मधुहेवाग्रतो यथा सर्वे भुञ्जते तथैव सुदुःखोपर्जितं द्रव्यम् अपरः कश्चित् भुङ्क्ते। कदाचित् व्याधस्य गीतेन मोहितः सन् मृगः बद्धो भवति, तदर्थं क्वचिदपि यतिर्वनचरो वा ग्राम्यगीतं न शृणुयात् यतोहि कदाचित् योषितां नृत्यवाद्यगीतानि जुषन् ऋष्यशृङ्गः वश्यः आसीत्। वडिशैर्यथा मीनः असंयतः सन् विनश्यति, तथैव कश्चिदपि रसनायाः वशः सन् विनश्यति। भोजनस्य अभावे रसना इतोपि वर्धते। यावत् पर्यन्तं रसनेन्द्रियं न जयेत् तावत् अन्यानि इन्द्रियाणि वशीकर्त्तुं न शक्यते।

पिङ्गलायाः उदाहरणं प्रस्तूय दत्तात्रेयः प्राह, यत् प्राचीनकाले पिङ्गला नाम्नी काचित् वेश्या आसीत्। कदाचित् परपुरुषं वशीकर्तुं विविधानि आयुधानि वस्त्राणि च परिधृत्वा गृहस्य पुरतः

अविभ्रमत्। मार्गे आगच्छतः वित्तवतः पुरुषान् वीक्ष्य मां प्रति आगच्छति इति चिन्तयामास। पुनः यदा सः गच्छति, पुनः अन्यं कामयते। सा सर्वदा आगतेष्वपयातेषु जनान् दृष्ट्वा अन्यः कश्चित् वित्तवान् माम् उपैष्यति इति अचिन्तयत्। परन्तु न कश्चित् तस्याः मनोनुगुणं याति। कदाचित् एवं क्रमेण तस्याः मनसि निर्वेदः जज्ञे। ततः तस्याः मुखात् एकः रवः आगतः, यत् आशापाशान् छित्वा निर्वेदं प्रति गमने शान्तिर्भविष्यति। अज्ञानी यथा ममतां न त्यजति तथैव प्राज्ञः देववन्धं न जिहासति। एवं रूपेण पिङ्गला धनलोभं त्यक्त्वा धनीकानां मिलनस्य आशां त्यक्तवती। ततः एवं दत्तात्रयेण शिक्षितं विद्यत् यत् आशा हि एव परमं दुःखं, नैराश्यं परमं सुखं यथा पिङ्गला पुरुषसुखात् विच्युता भूत्वा सुखेन सुष्वाप।

**बोधप्रश्नः**

१. कः गुणसत्त्वेऽपि उदासीनः सन् शेते ?

२. दुःखस्य कारणं किम् ?

३. अग्नौ कामासक्तः सन् कः पतति ?

४. कः देशवन्धं न जिहासति ?

## कुररात् भृङ्गीं यावत् नवगुरवः

सर्वे स्वस्य सुखार्थं प्रियानां संग्रहणं कुर्वन्ति, तदेव दुःखस्य कारणं भवति। एतस्य दृष्टान्तपरिप्रेक्षे सः दत्तात्रेयः कुररखगः स्वीकृतः। कदाचित् एकः कुररः मांसमेकं समविन्दत। तं मांसं दृष्ट्वा अन्ये च सर्वे वलिनः कुररं जघ्नुः। तत् परित्यज्य सः तस्मात् वञ्चितोऽभूत्। ततः एतस्मात् ज्ञायते यत् संग्रहणं विपदः कारणं भवति। शिशुः यथा निष्पापः सन् आनन्देन क्रीडति तथैव मानापमानं

परित्यज्य संसारदु:खात् विमुच्यते। ततः कस्याश्चित् कुमार्य्याः दृष्टान्तं स्वीकृत्य तस्याः वर्णनं दत्तात्रेयः प्रस्तौति। कदाचित् गृहे यदा न कोऽपि आसीत्, एका कुमारी आत्मानं वृणानान् आगतान् सर्वान् अर्हयामास। तेषामभ्यवहारार्थं गृहे पार्थिवेन उपायेन तण्डुलानि स्थापयामास। ततः शङ्खायाः महत्स्वनं श्रुत्वा ताः अवघ्नन्याः चक्रुः। क्रमेण एकैकाः शङ्खाः वभञ्ज। ततः परिशेषे द्वौ द्वौ पाणौ अशेषयत्। ततः उभयोः अपि शङ्ख्योः ध्वनिः समागता इति दृष्ट्वा एकमेव दधार, यतोहि एकस्मात् न भवेत् ध्वनिः। तस्याः कुमार्याः सकाशात् इदं अन्वशिक्षं यत् साधुः लोके एकाकी चरेत्, यतोहि वासे बहूनां कलहो वार्त्ता द्वयोरपि भवेत् ।

पुनः एकत्रैव मनः संयुज्य प्राणायमादीनामाचरणं कर्त्तव्यम्। वैराग्याभ्यासेन यथा मनः संयमः भवति। एतत् कुम्भारात् अशिक्षत् दत्तात्रेयः। मुनिः सर्पवत् वासस्थानं प्रति आसाक्तिं न संस्थाप्य पर्वतकन्दरे तिष्ठेत्। सर्पाः यथा पर्वतकन्दरे मूषिकानां गर्त्ते अपि तिष्ठति तद्वत् ज्ञानी वासस्थानं न स्वीकृत्य इतस्ततः विभ्रमेत्। ऊर्ण्णनाभिः यथा स्वस्य मार्गं प्रति उभयमुपादानं निमित्तं कारणं च भवति, तद्वत् इश्वरः साक्षात् नारायणः जगतः निमित्तमुपादानं च कारणद्वयं वर्त्तते। कीटादपि दत्तात्रेयः अशिक्षत् यत् यत्र यत्र मनः स्नेहाद् द्वेषाद्वा धारयेत् तत्तत् सः सरूपतामुपैति। एवं रूपेण विविधाः शिक्षाः संप्राप्य दत्तात्रेयस्य अन्तःकरणे विज्ञानालोकः सञ्जातः। ततः सः दत्तात्रेयः स्वच्छन्देन भूमौ विचचार।

बोधप्रश्नः

१. कः जगतः उभयं कारणं विद्यते ?

२. सर्पवत् विद्वान् किमाचरेत् ?

३. मनः केन संयतः भवति।

**सारांश:**

अध्यायेऽस्मिन् यादवानां प्रभासक्षेत्रं प्रति गन्तुं प्रयास: विचारित। तत: भगवत: श्रीकृष्णस्य गमनार्थं प्रस्तुति: विहिता अस्ति। श्रीकृष्णस्य मन्त्री उद्धव: तदागत्य भगवन्तं प्रति विविधान् विषयान् पप्रच्छ। तस्य कथनस्य समुचितमुत्तरं भगवता प्रस्तुतं विद्यते। भगवत: साक्षात् स्वरूपविषयकं व्याख्यानमत्र श्लाघ्यते। भगवत: श्रीकृष्णस्य अवधूतविषयकमुपाख्यानमस्य अध्यायस्य वैभिन्न्यतां प्रतिपादयति। अत्र अवधूतस्य चतुर्विंशतिगुरुणां विषये श्रूयते। पृथिव्या: आरभ्य कीटं यावत् वर्णनं समुपलभ्यते।

# आदर्शप्रश्नाः

## लघूत्तरीयप्रश्नाः

१. कुमार्य्याः दृष्टान्तः।

२. ऋष्यशृङ्गस्य आसक्तता।

३. इन्द्रियाणां स्वरूपम्।

## विश्लेषणात्मकप्रश्नाः

१. अवधूतस्य चरित्रं चित्रयत।

२. कपोतस्य गुरुत्वं साधयत।

३. पिङ्गलायाः चरितं साधयत।

## निबन्धात्मकप्रश्नाः

१. अवधूतस्य चतुर्विंशतिगुरुणां समीक्षणं कुरुत।

२. श्रीकृष्णोद्धवसम्वादस्य निर्यासं तत्त्वं स्पष्टीकुरुत।

## एकाङ्कप्रश्नाः

१. यदुः सुखेन विभ्रमन्तं कं पप्रच्छ ?

२. दत्तात्रेयसम्वादः कः शृणोति ?

३. मधुमक्षी केषां कृते मधुसंग्रहणं करोति ?

४. मत्स्य केन जाले निबद्धो भवति ?

५. पतङ्गः केन अग्नौ पतति ?

६. किं परमं सुखं वर्त्तते ?

७. वेश्यायाः नाम किम् आसीत् ?

८. अजगर: कीदृश: सन् शेते ?

९. काभ्यां मन: जयेत् ?

१०. साधु: केन प्रकारेण चरेत् ?

११. क: संसारस्य सृष्टिकर्त्ता वर्त्तते ?

१२. क: देशवन्धं न जिहासति ?

**उत्तराणि**

१. दत्तात्रेयं २. उद्धव: ३. अन्येषां कृते ४. रसनासक्तेन ५. कामासक्तेन ६. नैराश्यं ७. पिङ्गला ८. उदासीन: ९. अभ्यासवैराग्याभ्यां १०. एकाकी ११. नारायण: १२. प्राज्ञ:

# चतुर्थोऽध्यायः

**प्रस्तावना –**

भगवतः दत्तात्रेयस्य गुरुणां विषये पूर्वमधीतं वर्त्तते। अस्मिन् अध्याये विविधानामलौकिकानां रहस्यानां विषये ज्ञायते। साक्षात् भगवतः मुखकमलात् विविधाः धर्माः प्रोक्ताः विद्यन्ते। अस्मिन् लोके तथा परलोके जनानां प्रवृत्तिविषयकः विचारः प्रस्तुतः। सांसारिकभोगानां प्रति जनानाम् आसक्तिहेतोः गतिः कीदृशी भवति तदत्र विचार्यते। संसारे विविधानां बद्धानां तथा मुक्तानां स्वरूपं तथा जीवने अनासक्तरूपेण कार्याणि कर्तुं श्रीमद्भागवतं सर्वदा प्रचोदयति। समाजे सत्सङ्गस्य स्वरूपं ज्ञात्वा सर्वे तथैव भाव्यमिति चिन्तनं भविष्यति। ततः आसक्तकर्मणां परित्यागः विहितकर्मणामनुष्ठानं च प्रतिपादितं विद्यते।

**उद्देश्यानि**

अस्मिन् अध्याये अधोलिखितान् शीर्षकान् सर्वे वेदिष्यन्ति।

- **लौकिकस्तथापारलौकिकभोगानामसारता निरूपणम्**
- **बद्धमुक्तयोस्तथा भक्तानां लक्षणम्**
- **सत्सङ्गस्य महिमा**
- **कर्मत्यागस्य विधिः**
- **गुणानां वर्णनम्**

**लौकिकस्तथापारलौकिकभोगानामसारता निरूपणम्**

साधकः सदासर्वदा सर्वतोभावेन भगवतः अनुगतः भवेत्। भगवता उपदिष्टस्य मार्गस्य परिपालनं कृत्वा स्वस्य वर्णधर्माश्रमकुलाचारं त्यक्त्वा भगवन्मार्गः समाचरेत्। ततः तेषां कर्माणि परिणामस्य विपरीतं भवति। अतः शुद्धान्तःकरणेन संसारात् विमुखो भव। स्वप्नावस्थायां दृश्यमानं जगत् यथा स्वप्नानन्तरं मायायां विलीनो भवति तथैव परिदृश्यमानं जगत् त्यक्त्वा अनन्यभक्त्या भगवत् शरणापन्नो भव। अज्ञानादेव नानत्वस्य भ्रम उत्पद्यते। यः भगवत्परायणः भक्तः सः निष्कामकर्मी भवेत्। भगवत्परायणशीलेन यमे विद्यमानानां सर्वेषां पालनं करणीयम्। अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहात्मकानां पञ्चयमानां पालनमावश्यकं वर्तते। शौचसन्तोषतपस्वाध्यायेश्वरप्रणिधानानि इत्यादीनि कर्तव्यानि भवन्ति। निरभिमानः मात्सर्यरहितः ममतारहितस्तथा विवेकशीलो भवेत्। जायापत्यगृहक्षेत्रस्वजनादिषु उदासीनः सन् समं पश्येत। अग्निः यथा दाहकादिषु भिन्नरूपेण भवति, तथा आत्मा स्थूलसूक्ष्मदेहात् विलक्षणः भवति। आत्मा स्वात्मनि प्रतिष्ठितं भवति। सत्यज्ञाननिमित्तं गुरोः आवश्यकता विद्यते। गुरोः सकाशात् बुद्धिः यदा सूक्ष्मो भवति तदानीं मायायाः त्रिगुणात्मकस्वरूपं तस्य मनसि नश्यति। एतत् तत्त्वज्ञानं गुणान् दहति।

इहलोके यथा दोषयुक्तः परलोके अपि सः दोषयुक्तो भवति। तत्रापि स्पर्द्धासूयादयः सर्वे नष्टाः भवन्ति। क्षीणे पुण्ये पुनः मर्त्त्यलोकं प्रति आगच्छन्ति। कामनासक्तः जनः सर्वविधमनर्थं कारयति। यज्ञकर्ता यज्ञद्वारा देवानामारधनं कृत्वा स्वर्गं प्रति याति तत्रापि सः देवतावत् पुण्यानि भुङ्क्ते। यदि कश्चित् मनुष्यः कुसङ्गतौ अधर्माचरणं करोति, तथा इन्द्रियाधीनं भवति, नीतिनियमान् न परिपाल्य यथावदाचरति सः शनैः शनैः कृपणो भवति। सः अवश्यमन्धकारमयनरके सीदति। सकलानि सकामकर्माणि सर्वेभ्यः दुःखमेव ददाति। अतः अनासक्तः सन् कर्माणि साधनीयानि भवन्ति।

सत्त्वादिगुणाः इन्द्रियेभ्यः प्रेरयन्ति। मायायां यदा क्षोभः उत्पद्यते तदानीं तासां व्यवहारिकरूप नानात्वेन प्रतिभासितो भवति। अतः इहलोके परलोके च कर्मवन्धनात् सदासर्वदा अनासक्तो भवेत्। निष्कामकर्मी मोक्षमार्गस्य पथि सर्वदा चलति, यत् तस्मै इहकाले परकाले च फलं ददाति।

बोधप्रश्नः

१. कस्मात् सकाशात् बुद्धिः सूक्ष्मा भवति ?

२. कः आत्मनि प्रतिष्ठितो भवति ?

**बद्धमुक्तोस्तथा भक्तानां लक्षणम्**

बद्धमुक्तयोः प्रभेदः गुणं स्वीकृत्य निर्णीयते। आत्मनः वद्धमुक्तयोः भेदः नास्ति। परन्तु शरीरस्य वद्धमुक्तयोः संज्ञा भवति। माया भगवतः शक्तिस्वरूपा विद्यते। गुणाः सर्वे मायायाः अधीने सर्वान् मोहादीन् प्रकाशयन्ति। स्वप्नो यथा मिथ्या वर्तते तथा आत्मनः संस्मृतिरपि मिथ्या भवति। विद्याविद्ये भवति भगवतः द्वे शक्ती। शरीरिणाम् मोक्षवन्धयोः कारणं भवति। जीवः केवलं भगवतः अंशस्वरूपः। अनादि अविद्या जीवं वन्धने आवद्धं करोति, तथा विद्याशक्तिः जीवस्य मोक्षमार्गं प्रति मार्गं प्रशस्तीकरोति। जीवः भगवतः स्वरूपत्वात् आत्माजीवयोः मध्ये प्रभेदः न विद्यते। बद्धस्य मुक्तस्य वैलक्षण्यं भवति। तौ द्वौ विरुद्धधर्मिणौ भवतः, परन्तु एकधर्मित्वेन स्थितिर्भवति।

बोधप्रश्नः

१. बद्धमुक्तयोः संज्ञा कस्य भवति ?

२. का जीवं संसारपाशे आबद्धं करोति ?

**सत्सङ्गस्य महिमा**

भगवान् श्रीकृष्णः सत्सङ्गस्य महत्त्वमुद्धवं प्रति कथयामास। सर्वासु साधनासु सत्सङ्गो भवति श्रेष्ठसाधना। सत्सङ्गमाध्यमेनैव सर्वे भक्ताः भगवन्तं प्राप्नुवन्ति। यत् फलं सत्सङ्गेन लभ्यते तत् न अन्यानि समाचर्य प्राप्यन्ते। योगसांख्यधर्मस्वाध्यायतपत्यागेष्टपूर्त्तौ तथा यज्ञदानदक्षिणाव्रततीर्थमन्त्रादिषु यत् फलं भगवत्सन्निधिः न लभ्यते तत् सर्वं सत्सङ्गाचरणेन प्राप्यते।

प्रत्येकऽस्मिन् युगे विविधाः दैत्यराक्षसगन्धर्वनागसिद्धचारणादयः सर्वे मां सत्सङ्गाचरणेनैव प्राप्तवन्तः। मानवेषु विविधाः वर्णाः सत्सङ्गाधारेणैव इहलोके पुण्यं लब्ध्वा परमपदं प्राप्तवन्तः। वृत्रासुरप्रह्लादवृहपर्वावलिवाणासुरमयविभीषणसुग्रीवहनुमाञ्जाम्ववान्गजेन्द्रजटायुतुलाधारवैश्यधर्मव्याध-कुब्जादय सर्वेऽपि सत्सङ्गं संप्राप्य मम परमपदं लब्धवन्तः। विविधाः महापुरुषाः व्रताचरणं विना अपि सत्सङ्गस्य प्रभावेन ममलोके व्रजन्ति। सर्वेषु साधनेषु अयं मार्गः अतीव कोमलो वर्तते। वलरामेन सार्द्धं मथुरां यदाहं अव्रजं, तदानीं मम वियोगे ते सर्वे अतीव व्याकुलिताः आसन्। मम विच्छेदे सर्वे गोपीजनाः एकमपि क्षणं कल्प इव चिन्तयन्ति। इहलोकस्य परलोकस्य भावं त्यक्त्वा अनन्यभक्त्या सत्सङ्गमाध्यमेन कीर्तनं कृत्वा शरणापन्नः यः भवति स मे प्रियो भवतीति श्रीकृष्णः प्रतिपादयामास।

बोधप्रश्नः

१. के सत्सङ्गस्य प्रभावेण वैकुण्ठं जग्मुः ?

२. केन सर्वं साधयितुं शक्यते ?

**कर्मत्यागस्य विधिः**

उद्धवं प्रति भगवान् श्रीकृष्णः विविधेषु विषयेषु तत्त्वज्ञानं प्रतिपादयामास। ततः उद्धवः स्वधर्मस्य पालनं श्रेयमुतवा भगवत्शरणं श्रेयमिति पप्रच्छ? ततः कर्मणः त्यागः कथं कर्तव्यमिति विषये श्रीकृष्णः साक्षात् प्राह। परमात्मा सर्वेषु भूतेषु  अन्तः विद्यमानो वर्तते। सः परमेश्वरः सर्वादौ परावाणीरूपेण अनाहतनादस्वरूपेण प्राणैः सह मूलाधारचक्रे प्रविशति। ततः मणिपुरकचक्रे पश्यन्ती नाम्नी वाचः सूक्ष्मरूपं स्वीकरोति, तथा कण्ठदेशे विशुद्धचक्रमागत्य मध्यमा नाम्नी वाचः रूपं स्वीकरोति। ततः मुखद्वारमागत्य अकारादिवर्णस्वरमात्रादिरूपेण स्थूलरूपम् उपैति। एतदर्थं शब्दब्रह्म परमात्मनः अभिव्यक्तिः भवति।

यत् कर्म क्रियते तत् सर्वं मां समर्प्य ये जना कुर्वन्ति तेषां कर्मत्यागो भवति। सर्वत्र भगवतः सत्तामङ्गीकृत्य गमनस्पर्शनश्रवणमननग्रहणादीनि कर्माणि करोति तस्य कर्मत्यागो भवति। अस्य संसारवृक्षस्य वीजद्वयं भवति पापपुण्यं च। अस्य शतं संख्यकं मूलं विद्यते। सत्त्वरजतमरूपेण त्रिगुणाः भवन्ति अस्य मुख्यशाखाः। एतस्मात् वृक्षात् पञ्चरसाः निष्पद्यन्ते, यानि तन्मात्राणि वर्तन्ते। अस्य एकादशशाखाः विद्यन्ते यानि दशेन्द्रियाणि मनश्च। अस्मिन् वृक्षे द्वावेव नीडं रचयित्वा तिष्ठतः जीवेश्वरौ। वातकफपितरूपेण अस्य वृक्षस्य वल्कलत्रयं वर्तते। सूर्यमण्डलपर्यन्तं वृक्षः विस्तृतो विद्यते। अस्य वृक्षस्य द्वावेव मधुरं फलं वर्तते। यं च फलं दुःखरूपेण सांसारिकः भुङ्क्ते। अपरं च नीरं त्यक्त्वा क्षीरं पिबन्तः हंसरूपाः अरण्यवासिनः खादन्ति। यः सद्गुरुं प्राप्य सांसारिकविषयादिषु अनासक्तः सन् वेदस्य तात्पर्यं ज्ञात्वा परमात्मनि लीनो भवति तस्य कर्मसंसारवन्धनात् मुक्तिः अवश्यं भवति। कर्मत्यागं कृत्वा अनासक्तरूपेण भगवतः शरणापन्नः इहलोके परलोके च पुण्यभाग् भवति।

बोधप्रश्न:

१. कस्य शतं मूलानि विद्यन्ते ?

२. केन इहलोके परलोके च पुण्यभाज: जना: भवन्ति ?

३. के वेदस्य तात्पर्यं जानन्ति ?

**गुणानां वर्णनम्**

सत्त्वरजतमांसि त्रिगुणाः बुद्धेः विविधानि रूपाणि विद्यन्ते। आत्मना सह एतेषां गुणानां न कोऽपि संबन्धो विद्यते। सत्त्वगुणद्वारा रजतमसो: नाश: क्रियते। अन्त:करणं यदा शुद्धं भवति तदा गुणान् विसृज्य गुणातीतरूपेण प्रवर्तितव्यम्। जन: सत्त्वगुणसम्पन्नो भूत्वा भगवत्प्राप्ते: मार्गं प्रति सूचाररूपेण याति। सत्त्वगुणसम्पन्न: मानव: सात्त्विकानि द्रव्याणि व्यवहरति। सत्त्वगुणस्य अभिवृद्धि: भवति चेत् अनयो: रजतमसो: लय: जायते। गुणानामभिवृद्धये दशकारणानि भवन्ति। शास्त्रं, जलं, प्रजा, देश:, काल:, कर्म, जन्म, ध्यानम्, मन्त्र:, संस्कारश्चेति। एतानि द्रव्याणि यदि सात्तिकानि भवन्ति तर्हि सात्त्विकगुणस्य वृद्धिर्भवति। रजोगुणे रज: तमो गुणे तम: भवति। यद् यद् वृद्धा: प्रचक्षन्ते ते सर्वे सात्त्विका:, यत् उपेक्षन्ते ते राजसिका: यत् निन्दन्ति स: तामसिक: । सत्त्वगुणस्य अभिवृद्धिनिमित्तं सत्त्वानि द्रव्याणि सेवनीयानि, क्रमेण अन्येषां गुणानामपि भवति। ज्ञानरूपकाग्नि: गुणान् शाम्यति।

मन: स्वरूपत: सत्त्वगुणयुक्त: परन्तु अहंत्व-ममत्वकारणादेव तत्र तम: प्रविशति। रजोगुणोपेतं मन: विविधं संकल्पविकल्पात्मकं भवति। तस्मात् कामना जायते। कामत्वात् बुद्धि: कलुषितो भवति। रजोगुणस्य आवेगेनैव मानव: कर्मवन्धने लिप्तो भवति। निरन्तरं विषयासक्तं भूत्वा मन: एकत्रीकृत्य भगवन्तं प्रति अनन्य अहैतुकभक्ति-माध्यमेन कर्मवन्धनात् मानव: प्रमुच्यते।

बोधप्रश्न:

१. बुद्धे: विविधानि रूपाणि कानि च भवन्ति ?

२. मनस: स्वरूपं कीदृशम् ?

३. बुद्धि: कस्मात् कलुषितो भवति ?

## सारांश:

अत्र जगत: सत्ता तथा लौकिकपारलौकिकभोगानां प्रति मानवानां प्रवृत्तिं विधाय एतस्य जगत: असारतां चित्रिता दृश्यते। मायाया: प्रभाव: तथा तस्या: क्षोभादेव उत्पद्यमानस्य संसारस्य विविधानां स्वरूपाणां विषये श्रूयते। बद्धमुक्तयो: पुरुषयो: विषये विचार: प्रस्तुत:। एतयो: द्वयो: आचरणं व्यवहार: कर्म इत्यादीनां विविधानां विषयाणामुपरि विचार: स्वीकृतो भवति। विषयभोगस्य विविधानि कारणानि, गुणत्रयाणां सांसरिकविषयं प्रति प्रभाव: परिचर्चित:। आत्मचिन्तनस्य स्वरूपं तथा निष्कामकर्म कृत्वा भगवत: चिन्तनं तथा मननं भक्तिमार्गस्य श्रेष्ठोपाय: इति कीर्त्तित:। साधुपुरुषाणां लक्षणं स्वभावादीनां वर्णनं प्रतिपाद्यते। सर्वेषु मार्गेषु सत्सङ्गस्य भूमिका अनेन प्रतिफलितस्य व्यवहारस्य विषये चर्चा विहिता। विविधानां कर्मणां कर्मत्यागस्य विधि: प्रस्तुतो विद्यते।

# आदर्शप्रश्नाः

**लघूत्तरीयप्रश्नाः**

१. बद्धस्य लक्षणम्।

२. मुक्तस्य स्वरूपम्।

३. मायायाः प्रभावः।

**विश्लेषणात्मकप्रश्नाः**

१. सत्सङ्गस्य महत्त्वं विशदयत।

२. भक्तानां लक्षणानि प्रतिपादयत।

३. गुणानामभिवृद्धये कारणानि स्पष्टयत।

**निबन्धात्मकप्रश्नाः**

१. कर्मत्यागस्य विधिं वर्णयत।

२. गुणानां स्वरूपं विशदयत।

३. लौकिकपारलौकिकभोगानामसारतां स्पष्टयत।

**एकाङ्कप्रश्नाः**

१. बद्धमुक्तयोः संज्ञा कस्य भवति ?

२. पापपुण्यं च कस्य शाखाद्वयम् ?

३. अनन्यभक्त्या कः भगवन्तं ध्यायति ?

४. श्रीकृष्णस्य अग्रजः कः ?

५. परापश्यन्तीमध्यमादयः कस्य स्वरूपं विद्यते ?

६. नाभिचक्रे का वाक् भवति ?

७. अहंत्वममत्वकारणादेव मनसि किं प्रविशति ?

८. भगवद्भक्तः कीदृशो भवेत् ?

९. आदौ ब्रह्म कस्य स्वरूपम् ?

१०. वृत्रासुरप्रह्लादादयः केन भगवतः सान्निध्यं प्राप्तवन्तः ?

११. गुणानामभिवृद्धये कति कारणानि वर्णितानि सन्ति ?

१२. स्थुलसूक्ष्मरूपात् कः भिन्नो भवति ?

**उत्तराणि**

१. शरीरस्य २. संसारवृक्षस्य ३. योगी ४. वलरामः ५. शब्दब्रह्मणः ६. पश्यन्ती

७. तमः ८. निष्कामी ९. शब्दस्य १०. सत्सङ्गेन ११. दश १२. आत्मा

## पञ्चमोऽध्याय:

**प्रस्तावना –**

पूर्वऽस्मिन् अध्याये भगवत्प्राप्ते: सहायकानि कर्माणि ज्ञातानि। अस्मिन् अध्याये अपि विविधा: ज्ञातव्या: विषया:सन्ति। असारसंसारस्य पापतापात् विमुच्यार्थं विविधा: मार्गा: अत्र प्रोक्ता: सन्ति। सदासर्वदा जनानां हिताय तथा सत्कर्मणि प्रवर्त्तनार्थं मार्गा: दर्शिता:। अयं मार्ग: साक्षात् भगवत: श्रीकृष्णस्य मार्गो वर्तते। तेन मार्गेण ये जना: गच्छन्ति, ते अवश्यं जीवने साधुकार्यं कृत्वा इहकाले मोदन्ते। विविधेषु पुराणेषु महाभारते श्रीमद्भगवद्गीतायां भगवत: विविधय: विभूतय: प्रोक्ता: सन्ति, परन्तु अत्र साक्षात् श्रीकृष्ण: स्वयं स्वस्य स्वरूपं विवृणोति। विविधेभ्य: जनेभ्य: उपदेशछलेन समेषां कृते तत्कर्तुं प्रेरयति।

**उद्देश्यानि -**

अध्यायेऽस्मिन् विविधान् विचार्यान् विन्दून् सर्वे ज्ञास्यन्ति।

- **सनकादिभ्य: चतुर्भ्य: हंसरूपेण भगवत: उपदेश:**
- **भक्तियोगस्य महिमा**
- **ध्यानविधि:**
- **विविधानां सिद्धीनां नामानि तथा लक्षणानि**
- **भगवत: विविधानां विभूतीनां वर्णनम्**

**सनकादिभ्यः चतुर्भ्यः हंसरूपेण भगवतः उपदेशः**

कदाचित् ब्रह्मणः मानसपुत्राः सर्वे सनकादयः ब्रह्मणः समीपे उपविश्य चित्तगुणयोः तादात्म्यताविषये पप्रच्छुः। चित्तः स्वभावतः विषयासक्तः सन् तेषु प्रविष्टो भवति, परन्तु गुणसमूहस्य अनेके वृत्तयः अपि चित्ते भवन्ति। अतः संसारात् यः मुक्तिमिच्छति कथं पृतक्कृत्य त्रायति? अस्मिन् विषये यद्यपि सनकादयः सर्वे पुत्राः प्रश्नं चक्रुः, परन्तुं भगवतः ब्रह्मणः मनः सृष्टिप्रक्रियायामासीत्। अतं विष्णुं ध्यात्वा कथयामास। ततः नारायणः हंसरूपेण अविर्भुतः जातः। सर्वघटेषु आत्मनः सत्ता विद्यते। आत्मा एकः नानेको वर्तते। पञ्चभूतात्मकतत्त्वानि समानरूपेण तिष्ठन्ति। चित्तं विषयासक्तं भूत्वा यस्य ग्रहणश्रवणदर्शनमननादीनि कार्याणि करोति तानि सर्वाणि भगवदतिरिच्य न अन्यानि भवन्ति। यद्यपि चित्तः वारम्वारं विषयासक्तः सन् विषयाकारं भवति तथापि जीवस्य उभयं देहं भगवतः स्वरूपभूतमुपाधिर्वा विद्यते। विशुद्धात्मनः चित्तेन सह विषयेन सह न कोऽपि सम्बन्धो विद्यते। चित्तः विषयासक्तः सन् चित्तचाञ्चल्यं जनयति, येन जाग्रतस्वप्नसुषुप्त्याद्यवस्थानां जन्म भवति।

वास्तवेन आत्मनः भिन्नं न किमपि सत्ता विद्यते। दृश्यमानं जगत् मनसः एकं विलासमात्रम्। एतत् स्वप्न इव क्षणिकं भवति। एकः एव परमात्मा अनेकरूपेण प्रतिभाति। गुणत्रयाणां प्रभावमाध्यमेनैव भेदः उत्पद्यते। शरीरं प्रारब्धवशतः लभ्यते। मनुष्यस्य जाग्रदानन्तरं यथा स्वप्नः याति तथैव शरीरविषयभोगानन्तरं विमुच्यते। अतः साक्षात् सांख्ययोगसत्यतेजश्रीकीर्त्तिदमादीनामाश्रयस्थानं भगवान् नारायणः एव। सर्वे गुणाः विषयाः भगवन्तं भजन्ति। अतः सांसारिकवासनासु विमुक्तः सन् भगवत् शरणं काम्यम्।

बोधप्रश्न:

१. भगवान् केभ्य: कस्मिन् युगे च उपदेशं ददौ ?

२. सनकादय: ब्रह्मण: कीदृशपुत्रा: भवन्ति ?

३. कस्मात् जन: विमुच्यते ?

**भक्तियोगस्य महिमा**

सर्वे वेदाः उपनिषदः भगवतः स्तुतिं निरन्तरं कुर्वन्ति। साक्षात् भगवतः वाणीरूपेण वेदाः विद्यन्ते। वेदेषु भगवद्धर्मः एव प्रोच्यते। ब्रह्मा साक्षात् स्वायम्भुवमनुं वेदवाणीं प्राध्यापयामास। ततः भृग्वादि सर्वे ऋषयः गृहीतवन्तः। ततः सर्वे देवदानवराक्षसचारणसिद्धगन्धर्व-विद्याधरकिंदेवकिन्नरनागकिंपुरुषादयः सर्वे वेदविद्यायाः ज्ञानं प्राप्तवन्तः। तेषां बुद्धिज्ञानं भिन्न भिन्नमासीत्। अत: तदाधारेण वेदवाणी अपि भिन्ना जाता।

एतेषु येषां कर्मणि रुचिः आसीत् ते कर्म श्रेष्ठसाधनमिति चिन्तयामास। ये मोहविषादग्रस्ताः आसन् ते यशकीर्तिरिव साधनत्वेन अचिन्तयन्। केचन कामभोगं केचन सत्यसाधनं केचन स्वार्थसिद्धिं तथा केचन ऐश्वर्यलाभं श्रेष्ठसाधनमिति विचिन्त्य तदाधारेण प्रोचुः। सांसारिकमोहादिषु विषयेषु अनासक्त: सन् ये मां ध्यायन्ति ते सर्वे मे प्रिया: भवन्ति। भक्ता: अजितेन्द्रिया: सन्त: अपि शनै: शनै: क्रमेण विषयवासनां प्रति पराङ्मुखा: भवन्ति। प्रचण्डाग्नि: यथा इन्धनानि प्रज्वालयति तथैव मद्भक्ति: तान् जनान् विषयं प्रति अनासाक्तिं कारयति। ये जना भवगति भक्तिं कुर्वन्ति ते सर्वे शुद्धा: भवन्ति।

हृदये भक्तिभावं विना यदि कश्चित् ध्यायति तर्हि तस्य पवित्रता न आयाति। भक्तिसत्त्वेऽपि यदि मनसि तन्मयभावं न आयाति मनः उद्रेकः न भवति, शरीरं पुलकितं न भवति तस्य अन्तःकरणं

पूर्णरूपेण शुद्धं तावत् न भवति। अतः सर्वेषु साधनेषु भक्तिः भवति अनन्या शक्तिः। अनया शक्त्या भगवतः सान्निध्यं लभ्यते। केचन विषयं प्रति अनासक्ताः सन् अपि मनसि भक्तिभावानायाः अभावे मां न प्राप्तुं शक्नुवन्ति। अतः मनसि भक्तिवलेन प्राप्तुं मार्गः प्रशस्तो विद्यते। अनन्यभक्त्या भगवतः शरणापन्नाः भूत्वा आवेगेन ये ध्यायन्ति तेषां परमपदं प्राप्तिर्भवति।

बोधप्रश्नः

१. के च जनाः शुद्धाः भवन्ति ?

२. कः मार्गः भगवत्प्राप्तये सरलः मार्गः ?

३. के च वेदविद्यायाः ज्ञानं प्राप्तवन्तः ?

**ध्यानविधिः**

समानासने उपविश्य यथासुखं स्वनासाग्रकृतेक्षणः हस्त्रावुत्सङ्गं कृत्वा आधाय उपवेष्टव्यं भवति। इन्द्रियाणि संयम्य प्राणवायोः पथशोधननिमित्तं प्राणायामं समाचरेत्। क्रमेण पूरककुम्भकरेचकादीनां विधानं कृत्वा पुनः विपर्ययेणापि शनैः शनैः अभ्यसेत्। ॐकारेण सह प्राणायामः कर्तव्यः। ॐकारस्य हृदये चिन्तनं कृत्वा प्राणेनोदीर्यं कर्तव्यं। प्रत्यहं त्रिसन्ध्या आचरणीया भवति। योगी तस्य शरीरं पद्मकिसलवत् चिन्तयेत्। पद्मनालः शनैः शनैः उपरि अष्टदलपद्मे विपरिणमते इति ततः चिन्तयेत्। पुनः तस्म मध्ये कोमलकर्णिका अस्तीति चिन्तनीया। कर्णिकायाः उपरि चन्द्रसूर्याग्न्यादीन् देवान् न्यासं क्रियेत। अनेन स्वरूपेण ध्यानकरणेन अपूर्वानन्दः लभ्यते।

योगिनः ध्याने भगवतः स्वरूपं चिन्तनं कृत्वा भगवतः अवयवाः सुषमसरलसुन्दराः इति चिन्तयेयुः। भगवतः सर्वाङ्गस्य चिन्तनं भवेत्। यथा मुखे मन्दं मन्दं हसस्य चिन्तनं, कर्णयुगले

ज्योतिर्मयमकरकुण्डलं, वक्षस्थले श्रीवत्सचिह्न, अपरेऽस्मिन् लक्ष्या: चिन्तनं भवेत्। भगवत: अङ्गानां ध्यानानन्तरं चित्तं भगवत: मुखे स्थिररूपेण धारयेत्। चित्तस्य धारणानन्तरं भगवान् सर्वत्र परिव्याप्त: इति चिन्तयेत्। तदानीं भगवन्तमतिरिच्य अन्येषु चित्त: यथा न स्यात्। अनेन प्रकारेण अनन्यभक्त्या तथा ध्यानमाध्यमेन भगवत: सान्निध्यं लभते। ते योगिन: ध्यानवलेन परिशेषे परमात्मन: सत्तां केवलं पश्यन्ति, तथा परमात्मनि लीना: भवन्ति। परमात्नन: कृते तेषां सकलानां कार्याणां सम्पादनं भवति।

**बोधप्रश्न:**

१. केन सह प्राणायाम: कर्त्तव्यो वर्त्तते ?

२. कर्ण्णिकाया: उपरि कयो: न्यास: क्रियते ?

**विविधानां सिद्धीनां नामानि तथा लक्षणानि**

जितेन्द्रियस्य जितश्वासस्य योगिन: यदा एकाग्रचित्तेन मम ध्यानानुरक्ता: भवन्ति तदानीं तेषां पुरत: विविधा: सिद्धय: उपतिष्ठन्ति। धारणायोगपारगै अष्टादशसिद्धय: प्रोक्ता: सन्ति। तासु अष्टसिद्धय: भगवति विद्यन्ते। अन्या: सर्वा: दशसिद्धय: सत्त्वगुणविकशिते सति योगिन: प्राप्नुवन्ति। अणिमामहिमालघिमाप्राप्तिप्राकाम्येशत्ववशित्वकामावसायिता च। एतासु अणिमामहिमालघिमादि तिस्र: शरीरेण सह विद्यन्ते। प्राप्तिसिद्धीरिन्द्रियाणां वर्तते। लौकिकपारलौकिकवस्तूनाम् इच्छानुसारं भोग: वर्तते प्राकाम्य:। ईशत्वेन योगी माया तथा तस्या: कार्याणि यथेष्टं सञ्चालयति। विषयेषु प्रसक्ता: सन् अपि तेषु अनासक्तरूपेण भवति वशिता। कामवसायितासिद्धिवलेन योगी सुखभोगस्य चूडान्तस्थाने तिष्ठति। एता: सिद्धय: भगवति पूर्णरूपेण विद्यन्ते। एतदतिरिच्य इतोऽपि सिद्धय: सन्ति। क्षुधातृषाकामक्रोधवार्द्धक्यादि अप्रकाशरूपेण, बहुदूरे वस्तुस्थिते: अनुभव:, बहुदूरस्य वार्त्ताया: श्रवणं,

मनसा सह शरीरस्य विविधषु स्थानेषु रमणं, इच्छानुसारं रूपपरिवर्तनं, यदाकदाचित् देहपरित्यागः, अप्सरसैः सह विलासः, इच्छानुसारं संकल्पसिद्धिः, सर्वत्र आज्ञाप्रतिहतागतिः एताः दशसिद्धयः सत्त्वगुणस्य विशेषविकासे लभ्यन्ते। त्रिकालज्ञत्वमद्वन्द्वं परचित्ताद्यभिज्ञताग्न्यर्काम्वुविषादीनां प्रतिष्टम्भोऽपराजयादयः पञ्च गौणसिद्धयः अपि सन्ति।

पञ्चमहाभूतानां सूक्ष्मतमरूपं तन्मात्राणि भवन्ति। तन्मात्रं भवति भगवतः शरीरम्। यः योगी तन्मात्रे मनः धारयति सः अणिमासिद्धिं प्राप्नोति। महत्तत्त्वे परमात्मा प्रकाशितो विद्यते अतः महत्तत्त्वरूपी परमात्मनि ये मनः धारणावद्धं करोति सः महिमासिद्धिमाप्नोति। पृथक् पृथक् भूतानां तन्मात्रेषु मनः यदा धारणावद्धं भवति तदा महिमासिद्धिं प्राप्नोति। वाय्वादि पञ्चमहाभूतेषु आकाशः परमाणुरूपेण सर्वत्र परिव्याप्तो भवति अतः भगवान् अपि सर्वत्र परिव्याप्तो वर्तते। यः योगी सूक्ष्मरूपेण चित्तं संलग्नं कृत्वा भगवता सह सम्मील्य एकं भवति सः लघिमासिद्धिमाप्नोति। ते योगिनः सूक्ष्मातिसूक्ष्मपरमाणरूपेण अपि प्रतिध्वनिताः भवन्ति। मनः इन्द्रियाणां स्वामी वर्तते। यदि योगी भगवतः स्वरूपभूतसात्त्विकाहंकारे स्वमनः एकाग्रं करोति तर्हि प्राप्तिसिद्धिं प्राप्नोति। भगवान् अजन्मा, सकलब्रह्माण्डः तस्य शरीरे ओतःप्रोतः विद्यते। महत्तत्त्वस्य अभिमानी सूत्रात्माहिरण्यगर्भे मानसं धारयति सः प्राकाम्यसिद्धिं प्राप्नोति। ये जनाः विष्णुस्वरूपे चित्तसंलग्नं कुर्वन्ति ते ईशितासिद्धिं प्राप्नुवन्ति। यथा भगवान् जीवानां नियन्त्रणं करोति तथा सोऽपि कर्तुं शक्नोति। भगवान् नारायणः समेषामैश्वर्याणामधिपतिः वर्तते। यः योगी भगवतः नारयणस्वरूपे चित्तं संस्थाप्य धारणावद्धो भवति तथा भगवद्धर्मान् गुणान् आचरति तस्य वशितासिद्धेः प्राप्तिः भवति। यः योगी निर्गुणनिराकाररूपेण मोहकामानादिविरहितः सन् तिष्ठति, तथा मनसि काऽपि कामना विद्यते सः कामवसायितासिद्धिं प्राप्नोति।

भगवान् श्वेतद्वीपस्य स्वामी, यः योगी विशुद्धचित्तेन धर्मस्वरूपे मनः निवेशयति तं नरं क्षुधातृषाकामक्रोधौशोकमोहादयः ग्रासितुं न शक्नुवन्ति। आकाशात्मस्वरूपे यः मनसा नादचिन्तनं करोति सः दूरश्रवणात्मकसिद्धिं प्राप्नोति। पुनः यः स्वस्य नेत्रं सूर्ये तथा सूर्यं स्वनेत्रे आवद्धीकरोति तस्य दूरदर्शनात्मकसिद्धिः भवति। अनया संसारस्य दर्शनं कर्तुं शक्नुवन्ति। मनः उपादाय यद् यद् रूपं योगिनः विभूषन्ति ते तत् तत् रूपं प्राप्नुवन्ति। मनः भगवति समर्प्य यदि श्वासेन्द्रियाणि स्वस्यवशीकृत्य परकायायां प्रवेष्टुमिच्छति तर्हि तस्य प्रवेशः भविष्यति। पिण्डं हत्वा यदि योगी शरीरत्यागं कर्तुम् इच्छति तर्हि प्राणवायुं अङ्घ्रिस्थले मलद्वारस्य रोधनं कृत्वा क्रमशः हृदयादीनि उपरि स्थापयिष्यति। अनन्तरं ब्रह्मणि लीनो भवति। योगी यदि देवानां विलासस्थानं प्रति गन्तुमिच्छति तर्हि सः शुद्धसाश्वतस्वरूपं चिन्तयित्वा गन्तुं शक्नोति। उदके विद्यमानान् जीवान् यथा उदकं नाशयितुं न समर्थं भवति तथैव मयि चित्तसन्निवेशं कृतवतां योगिनां शरीरं अग्न्यादिभिः न हन्येत। भगवतः विभूतीरभिध्यायन् योगी अजयो भवति। जितेन्द्रियस्य दान्तस्य जितश्वासस्य मुनेः का सिद्धि दुर्लभा भवति ये मयि चित्तं संल्लग्नं कुर्वन्ति। जन्मौषधितपोमन्त्रैर्याः सिद्धयः प्राप्यन्ते ताः सिद्धयः योगवलेन लब्ध्वा योगी परमधाम व्रजति। सर्वासां सिद्धीनां योगस्य सांख्यस्य धर्मस्य ब्रह्मवादिनां प्रभुः भगवान् नारयणः। सकलानां जीवानामन्तःबहिश्च परिव्याप्तो वर्तते। सर्वेषां हृदि अदृश्यरूपेण द्रष्टारूपेण भगवान् तिष्ठति। अद्वितीयसर्वव्यापकात्मा भवति भगवान् श्रीमन् नारायणः।

**बोधप्रश्नः**

१. कति सिद्धयः प्रोक्ताः भवन्ति ?

२. कानि पञ्चमहाभूतानां सूक्ष्मरूपाणि भवन्ति ?

३. योगिनः ध्याने भगवतः कानि आयुधानि स्मरन्ति ?

**भगवत: विविधानां विभूतीनां वर्णनम्**

सर्वेषां जनानां गतिस्थितिमुक्तिहेतव: भवन्ति अपारकरुणामय: अद्वितीय: परमयोगी भगवान् श्रीकृष्ण:। सकलानां प्राणिनाम् अन्तरात्मा साक्षात् भगवान् एव। मर्त्ये पाताले द्युलोके भगवत: विभूतय: विद्यन्ते। विविधेषु रूपेषु भगवत्त: सत्ता विद्यते। अर्जुन: कदाचित् भगवत: विभूतीनां ज्ञानार्थं पप्रच्छ। सर्वेषां भूतानां स्थित्युद्भवादीनां कारणं भगवान्। गुणानां क्षोभसमये उत्पन्न: हिरण्यगर्भ: तथा वस्तुषु विद्यमान: ज्ञानशक्तिप्रधानविशेषरूप:। साक्षात् भगवान् ब्रवीति, सूक्ष्मभूतेषु अहं जीव:। गुणिनामप्यहं सूत्रं महतां च महान्, दुर्जयानां मध्ये भगवान् मन: वर्तते। वेदानामभिव्यक्तिनिमित्तं हिरण्यगर्भममस्वरूपं, अक्षराणामकारोऽहं तथा छन्दसां मध्ये गायत्री । सर्वेदेवानां मध्ये अहमिन्द्र:। अष्टवसूनां मध्ये अहमग्नि:, द्वादशादित्यमध्ये विष्णु:, एकादशरुद्रमध्ये शिव:। ब्रह्मर्षीणां भृगु:, राजर्षीणां मध्ये मनु:, दवर्षीणां नारद:, तथा धेनुषु हविर्धान्यस्मि। सिद्धेश्वराणां कपिल:, पतत्रिणां सुपर्णोऽहं, प्रजापतीनां दक्ष:, पितृणाम् अर्यमा वर्तते। एवं रूपेण सर्वेषु स्थलेषु भगवत: सत्ता अङ्गीक्रियते।

**बोधप्रश्न:**

१. केषां मध्ये भगवान् अग्नि: भवति ?

२. दक्ष: क: ?

३. कस्य सत्ता सर्वेषु विद्यते ?

## सारांश:

प्रत्येकऽस्मिन् समये विविधानि शास्त्राणि सर्वान् जनान् प्रवृत्तये प्रेरयन्ति। ज्ञानस्य अविरतस्त्रोतांसि तथा विविधेभ्य: देवेभ्य: नृपेभ्य: विविधान् उपदेशान् अत्र साक्षात् भगवान् केनचित् माध्यमेन ददौ। अध्यायेऽस्मिन् साक्षात् भगवान् सनकादिभ्य: सर्वेभ्य: हंसरूपेण उपदेशं ददौ। भगवत: भजनेन कीर्त्तनेन स्मरणेन यथा अनन्यभक्तिरुत्पद्यते तेन अवश्यं सर्वे देवलोके स्थास्यन्ति। अणिमामहिमादय: सर्वा: सिद्धय: अत्र प्रस्तुता: विद्यन्ते। संसारस्य सृष्टौ यानि कारणानि विद्यन्ते तानि प्रतिपादितानि सन्ति। भगवान् साक्षात् सर्वेषु भूतेषु सर्वेषु द्रव्येषु वर्त्तते। सर्वत्र भगवत: विभूतय: सन्ति। सर्वेषु द्रव्येषु भगवत: सत्तां प्रदर्शयितुं विविधा: विभूतय: प्रोक्ता: विद्यन्ते। भक्तियोगेन भगवत्प्राप्ति: भवति। भगवत्प्राप्ते: यानि सहायकानि साधनानि सन्ति, तानि सर्वाणि साधनानि अतिरिच्य भक्तियोगस्य महत्त्वं विहितं विद्यते।

## आदर्शप्रश्नाः

**लघूत्तरीयप्रश्नाः**

१. ध्यानविधेः स्वरूपम्।

२. भक्तियोगस्य महत्त्वम्।

३. सिद्धीनां नामानि।

**विश्लेषणात्मकप्रश्नाः**

१. भक्तियोगस्य स्वरूपं लिखत।

२. योगिनां प्रवृत्तिः स्पष्टयत।

३. भगवतः सनकादिभ्यः उपदेशं वर्णयत।

**निबन्धात्मकप्रश्नाः**

१. भगवतः विभूतयः प्रतिपादयत।

२. सिद्धीनां नामानि लक्षणानि विशदयत।

**एकाङ्कप्रश्नाः**

१. ध्यानसमये कस्य चिन्तनं कुर्यात्?

२. रेचकपुरककुम्भकादयः कस्य स्वरूपभूताः भवन्ति?

३. आणिमादयः के भवन्ति?

४. केभ्यः भगवान् उपादिदेश?

५. जगत् कस्य विलासमात्रम्?

६. कः भगवन्तं सर्वदा स्मरति?

७.   परमाणुरूपेण कः सर्वत्र परिव्याप्तो विद्यते ?

८. पञ्चभूतानि कस्माद् जायन्ते ?

९. के भगवन्तं सदा ध्यायन्ति ?

१०. सत्ययुगे भगवान् केन रूपेण आसीत् ?

११. देवर्षिणां मध्ये भगवान् कः ?

१२.  सनकादयः कस्य पुत्राः ?

**उत्तराणि**

१. ॐकारस्य  २. प्राणायामस्य ३.  सिद्धयः   ४. सनकादिभ्यः ५.    मनसः  ६. योगिनः

७.  आकाशः  ८. तन्मात्रेभ्यः  ९. योगिनः    १०.  हंस    ११. नारदः    १२.  ब्रह्मणः

# षष्ठोऽध्यायः

**प्रस्तावना –**

संसारेऽस्मिन् जीवाः विविधप्रकारेण जीवन्ति। सर्वेषां जनानां मुख्यं लक्ष्यं भवति भगवत्प्राप्तिः। केचन ज्ञानेन केचन भक्त्या केचन कर्मणा भगवत्प्राप्तिः निमित्तं स्वीयसाधनेन ध्यायन्ति। साक्षात् भगवान् श्रीकृष्णः परन्तु सर्वेषु साधनेषु श्रेष्ठसाधनं भक्तियोगः इति अब्रवीत्। वेदेषु प्रतिपादितानां विविधानां कर्मणामनुष्ठानार्थं वर्णविभागः अत्र प्रतिपादितो दृश्यते। समेषां विषयाणामन्तर्भावः श्रीमद्भागवतपुराणे अभवत्। विविधानामाश्रमाणां वर्णनं तथा तेषां कर्माणि प्रतिपादितानि सन्ति। यद्यपि एते सर्वेऽपि विषयाः कल्पशास्त्राङ्गतया धर्मशास्त्रस्य प्रतिपाद्यविषयो विद्यते, तथापि भगवान् श्रीकृष्णः साक्षादुद्धवं प्रति प्रोवाच। तदर्थमस्य विषयस्य महत्त्वं बहु वर्तते। भक्तियोगस्य महत्त्वं तथा अस्य प्राधान्यं सर्वत्र दरीदृश्यते। अतः भगवन्तं प्राप्तुं यानि साधनानि विद्यन्ते तेषु साधनेषु भक्तियोगः महत्त्वपूर्णो वर्तते। अतः भगवान् श्रीकृष्णः साक्षात् मोक्षसाधनार्थं भक्तियोगः मुख्योपायः इति प्राह।

**उद्देश्यानि –**

अस्मिन् अध्याये सर्वे एतान् अधोलिखितान् अंशान् पठिष्यन्ति।

- **वर्णाश्रमधर्मनिरूपणम्**
- **वानप्रस्थसन्न्यासिनां धर्मः**
- **ज्ञानभक्तियमनियमादीनां वर्णनम्**
- **ज्ञानकर्मभक्तियोगानां स्वरूपम्**

## वर्णाश्रमधर्मनिरूपणम्

कदाचित् भगवान् विष्णुः हंसरूपेण जगतः सृष्टिकर्तारं ब्रह्माणं परमधर्मं उपादिदेश। स्वस्य धर्मान् समाचर्य मनुष्य अस्मिन् लोके धर्मानुष्ठानं कर्तुं शक्नोति। आदौ सत्ययुगे हंस रूपेण एकः एव वर्णः प्रचलितः आसीत्। लोकाः सर्वे जन्मनादेव कृत्यकृत्याः अभूवन्। कृत्यकृत्याः प्रजाः जात्याः ततः कृतयुगमिति विदुः। एकः एव प्रणवः वेदः आसीत्। तपशौचदयासत्यादिभिः चतुर्भिः चरणैः युक्तः वृषभरूपधृक् धर्मः अहमेव आसमिति श्रीकृष्णः प्रोवाच। तस्मिन् युगे भक्ताः तपस्विनः हंसस्वरूपभूतस्य भगवतः आराधनां चक्रुः। त्रेतयायुगे प्राणस्वरूपेण हृदयात् त्रयीविद्यायाः प्रादुरभूत्। तस्याः विद्यायाः त्रिवृन्मुखः अहमेव आसम्। विप्रक्षत्रियविट्शूद्राः सर्वेऽपि मुखवाहूरुपादजाः अभूवन्। स्वभावादेव तथा आचरणादेव तेषां प्रामाण्यं लभ्यते। गृहस्थाश्रमो जघनतो ब्रह्मचर्यं हृदोः जज्ञे, तथा वक्षःस्थानाद् वानप्रस्थस्य शीर्षणि सन्न्यासः संस्थितोऽभूत्। वर्णानामाश्रमाणां च जन्मभूम्यनुसारिणीः नीचैर्नीचोत्तमोत्तमाः सर्वे आसन्। शमदमतपपवित्रतासन्तोषक्षमाशीलताउदारताउद्यमशीलतास्थिरतादयः ब्राह्मणानां स्वभावो वर्तते। तेजवलधैर्यवीरताउदारतादयः क्षत्रियाणां धर्मो वर्तते। आस्तिकतादानशीलतादम्भहीनतासेवापरायनादयः वैश्यानां स्वभावो वर्तते। निष्कपटरूपेण ब्राह्मणधेनुदेवानां सेवा शूद्राणां स्वभावः वर्तते। अपवित्रतामिथ्याचारचौरवृत्तिपरलोकं प्रति अविश्वासः कलहकामक्रोधादयः व्यसनानि अन्त्यजानां स्वभावो वर्तते। चतुर्णामाश्रमाणां वर्णानां साधारणधर्मो विद्यते यथा अहिंसासत्यमस्तेयकामक्रोधलोभरहितः, द्विजाः विविधान् संस्कारान् समाचर्य स्वस्व कर्मणि प्रवृत्ताः भवेयुः। वेदवाक्यगतार्थं सर्वदा अनुचन्तयेयुः। ब्रह्मचारी मेखलामृगचर्मवर्णानुसारं दण्डरुद्राक्षमालादीनां यज्ञोपवीतकमण्डलं च धारयेत्। स्नानभोजनहोमजपतपमलमूत्रत्यागसमये मौनिनः भवेयुः। एकाग्रचित्तेन सूर्याग्निदेवाचार्यगोब्राह्मणवृद्धानां सेवा तथा उपासना कारयेत्। गायत्रीमन्त्रस्य

जपविधानं कर्तव्यम्। प्रातः सायं च भिक्षाटनं कृत्वा गुरवे समर्प्य भक्षयेत्। आचार्येण उपसंगम्य सावधानेन अनुगच्छेत्। शुश्रूषमाणमाचार्यं सदा उपसीतो भवेत् नीरवत्। गुरुकुले भोगादिविवर्जितः सन् वसेद्, विद्या च समाप्येत। यः ब्रह्मचारी मूर्त्तिमान् देवगणेषु विचरणं कर्तुं इच्छति सः आजीवनं ब्रह्मचर्यं परिपालयेत्। शौचमाचमनस्नानसन्ध्योपासनसरलेनजीवनयापनतीर्थसेवाजपोऽस्पृश्यभक्ष्यासं सर्वेषां कृते कर्त्तव्यं भवति। मनोवाक्कायसंयमी ब्रह्मचारी एतान् धर्मान् पालयित्वा तेजस्वि भवेत्। यदि ब्रह्मचारी गृहे प्रवेष्टुमिच्छति तर्हि सः वेदाद्यध्ययनं कृत्वा आचार्येभ्यः दक्षिणां दत्त्वा समावर्त्तनसंस्कारेण संस्कारितः सन् स्नातको भूत्वा गृहस्थाश्रमे प्राविशेत्। ब्रह्मचर्यानन्तरं ब्रह्मचारी गृहस्थाश्रमे वानप्रस्थाश्रमे प्रवेष्टुं शक्नोति। ब्राह्मणः अपि सन्न्यासधर्मं ग्रहीतुं शक्नोति। ब्रह्मचर्यानन्तरं यदि ब्रह्मचारी गृहस्थाश्रमे प्रविशति तर्हि तेन सर्वलक्षणोपेताकन्यामेकां गृह्णीयात्।

यागयज्ञादिषु सर्वेषां वर्णानां समाधिकारो वर्तते। परन्तु दानप्रतिगहणस्य अधिकारः केवलं ब्राह्मणस्य विद्यते।

**बोधप्रश्नः**

१. वेदे सर्वे च वर्णाः कस्माद् जज्ञिरे इति प्रतिपाद्यते ?

२. वेदाध्ययनं केषां वर्णानाम् अधिकारो विद्यते ?

३. ब्रह्मचारिणः धर्माः के के भवन्ति ?

**वानप्रस्थसन्न्यासिनां धर्मः**

वैदिकसनातनधर्मे ब्रह्मचर्यगृहस्थवानप्रस्थसन्न्यासभेदेन चत्वारः आश्रमाः विद्यन्ते, तेषु आश्रमेषु सर्वादौ प्रारम्भिकावस्थायां कश्चित् ब्रह्मचर्याश्रमे गुरुगृहे जटाजीनधारणं पुरःसरं निवसेत्। ततः

वेदाद्यध्ययनं कृत्वा समावर्त्तनसंस्कारेण संस्कृतः सन् गृहस्थाश्रमे सर्वगुणान्वितां कन्यामेकां स्वीकृत्य विवाहमाचरेत्। ततः गृहस्थाश्रमे विविधान् यज्ञान् संपाद्य कालानुरोधने ऋणत्रयान्मुक्त्यर्थं सन्तानजन्म कारयेत्। ततः तृतीयं भागमायुषं वानप्रस्थाश्रमे सर्वं त्यक्त्वा वने विचरेत्। पुत्रेषु भार्यां न्यस्य सहैव वा स्वीकृत्य वनं विविक्षुः गच्छेत्। कन्दमूलफलैः भुङ्क्त्वा वल्कलं वासस्तृणं पर्णानि धारयेत्। केशरोमनखश्मश्रुमलानि दतः विभृयात्। धन्तान् अपि न मज्जेत। ग्रीष्मे सूर्यतापे तप्येत तथा वर्षाकाले जलधारं सहनं कर्त्तव्यम्। शिशिरे आकण्ठमग्नः भवेत्। अग्निपक्वं कालपक्वं च अश्नीयात्। खद्यानि उलूखलाश्मकुट्टे दन्तोलूखले वा अश्नीयात्। वने स्थित्वा दर्शपौर्णमासचातुर्मास्यानि यज्ञकर्माणि अनुष्ठेयानि भवन्ति। एवं कृते यदा शुष्काः भविष्यन्ति तदानीं ऋषीणां प्राप्तव्यस्थानं महर्लोकं प्रति सर्वे व्रजन्ति। परिशेषे विष्णुलोकं प्रति यान्ति। परन्तु ये सामान्यं कष्टं सोढ्वा स्वर्गब्रह्मलोकं प्रति गन्तुं वाञ्छन्ति तेषु न कोऽपि भिन्नः मूर्खो विद्यते। अतः निष्कामकर्म कर्त्तव्यं भवति। यदा आश्रमोचितकर्माणि न कर्त्तुं शक्नुवन्ति तदानीं प्रज्वलिताग्नौ प्रविश्य भगवति मनः समर्प्य व्रजेत्। कर्मस्वरूपेण ये लोकाः प्राप्यन्ते ते नरकादयः भवन्ति। अतः विधिपूर्वकं कर्माणि त्यक्त्वा सन्न्यासधर्मं प्रति प्रव्रजेत्। सर्वं त्यक्त्वा कायमनवचोभिः सह समर्पणभावः स्थापयेत्।

यदि सन्न्यासी वस्त्रं परिदधातुमिच्छति तर्हि कौपीनाच्छादनं कुर्यात्। पादं दृष्टिपूतं न्यसेत्, वस्त्रपूतं जलं पिबेत्, वाचं सत्यपूतां वदेत्, मनःपूतमपि समाचरेत्। सप्तगृहेषु विगर्ह्यान् त्यक्त्वा भिक्षां चरेत्। एकाकीनः सन् सन्न्यासी चरेत्, संयतेन्द्रियः सन् निःसङ्गः परिव्रजेत्। आत्मक्रीड आत्मरत आत्मवान् च सः भवेत्। सः सन्न्यासी पुण्यदेशे तथा सरित्सु पर्वते च विभ्रमेत्। विचारशीलः सन्न्यासी दृश्यमानं जगत् सत्यमिति कदाचिदपि न चिन्तयेत् केवलं मायामात्रमिति चेन्तयेत्। ज्ञाननिष्ठवैरागीसन्न्यासिनः सर्वान्

त्यक्त्वा विधिनिषधयो: उपरि स्थित्वा स्वच्छन्देन वने विचरेत्। सन्न्यासी अलब्धे भोजने न विषीदेत काले काले अशनने अपि तिष्ठेत्, भोजनं प्राप्ते सति न हृष्येत्। धृतिं संस्थाप्य संचरेत्।

वनौकस: भिक्षोर्धर्म: शमोऽहिंसा तप ईक्षा च मुख्यधर्मो विद्यते। य: जन: अनन्यपरायण: सन् वर्णाश्रमे भगवद्भक्तपरायण: सन् भाक्तिं विन्दते, स: परमधाम्नि सर्वदा विचरति।

बोधप्रश्न:

१. सप्तगृहेषु क: भिक्षाटनं कुर्यात्?

२. वानप्रस्थानां परमधर्म: क:?

३. सन्न्यासी कुत्र तिष्ठेत्?

**ज्ञानभक्तियमनियमादीनां वर्णनम्**

य: विद्याश्रुतिसंपन्न: आत्मवान् नानुमानिक:, स: सर्वं मायामात्रमिति विचिन्त्य सर्वं ज्ञान मयि संन्यसेत्। ज्ञानिन: आवेष्ट साक्षादहं, तेषां स्वर्गापवर्गादीनां साधनोऽहमिति श्रीकृष्ण: अब्रवीत्। ज्ञानविज्ञानसंपन्ना: सिद्धपुरुषा: भगवत: प्रकृतं स्वरूपं जानन्ति। अत: ज्ञानिन: मे अतिप्रिया: इति प्राह। ज्ञानिन: सर्वे निरन्तरं स्वस्य अन्त:करणे मां धारयन्ति। ज्ञानस्य क्षुद्रांशेन अपि सिद्धि: लभ्यते, तत् तपस्वाध्यायसंयमतीर्थजपदानध्यानादिभि: न लभ्यते। अत: ज्ञानेन स्वस्य आत्मस्वरूपं ज्ञात्वा भक्तिभावेन मां भज। ऋषय: सर्वे अन्त:करणे ममस्थिते: अनुक्षणं चिन्तनं कृत्वा यजनं कृत्वा च परमसिद्धिं लब्धवन्त:। देहेन्द्रियान्त:करणे त्रिगुणात्मकं यत् शरीरमस्ति तस्य आश्रयमज्ञानहेतो: सर्वै: स्वीक्रियते। शरीरस्य जन्मादि षड्विकारा: भवन्ति।

सर्वेषु धर्मेषु मोक्षधर्मः श्रेष्ठतमः। अयं धर्मः ज्ञानविज्ञानश्रद्धासंयमभक्तिभावेन परिपूर्णः विद्यते। ब्रह्मणः आरभ्य प्रकृतिपुरुषमहदहङ्कारतन्मात्राणीन्द्रियाणिपञ्चमहाभूतानिमनस्तथागुणत्रयादीनि अष्टविंशतितत्त्वानि परिव्याप्ते संसारे एकमात्रं परमतत्त्वं परमात्मा एव तिष्ठति इति ज्ञानं वास्तविकं ज्ञानं। ये भक्ताः भगवद्भक्त्या मनोनिवेष्टुमिच्छचन्ति ते भगवतः अमृतमयी लीलामाध्यमेन विविधासु कथासु श्रद्धा आनेतव्या वर्तते। परिचर्यायामादः भवेत् । मनसः सर्वकामविवर्जनं तस्य भवेत्।

**बोधप्रश्नः**

१. सर्वेषु उपायेषु भगवत्प्राप्तेः श्रेष्ठोपायः कः ?

२. कस्य जन्मादयः षड्विकाराः भवन्ति ?

३. के भगवतः प्रकृतस्वरूपं जानन्ति ?

**ज्ञानकर्मभक्तियोगानां स्वरूपम्**

मानवानां परमकल्याणनिमित्तं भगवान् उपदेशव्याजेन विविधान् वर्णधर्मान् आश्रमधर्मान् वेदेषु प्रतिपादयामास। अधिकाराधारेण योगाः त्रिविधाः भवन्ति, ज्ञानकर्मभक्तियोगाश्च। मानवानां परमकल्याणार्थम् एतत् त्रितयं विना अन्यत् किमपि न विद्यते। ये कर्म प्रति तथा कर्मणः फलं प्रति अनासक्ताः भवन्ति, येषां मनसि कर्मत्यागस्य भावना आगच्छति, ते सर्वे ज्ञानयोगस्य अधिकारिणः भवन्ति। विपरीतरूपेण येषां मनसि कर्म प्रति अनासक्तभावना नागता विद्यते, चित्ते कर्मफलभोगं प्रति वैराग्यं नागतं वर्तते, ते सर्वे कर्मयोगस्य अधिकारिणः सन्ति। परिशेषे ये जनाः अत्यन्त विरक्ताः न सन्ति तथा अत्यन्त आसक्ताः अपि न भवन्ति पूर्वजन्मनः शुभकर्मफलेन अस्मिन् जन्मनि भगवत्सान्निध्यं लब्ध्वा भगवति श्रद्धा जायते ते सर्वे भक्तियोगस्य अधिकारिणः भवन्ति। यावत् पर्यन्तं

कर्मवन्धनात् मानवः न प्रमुच्यते कर्मणः फलं प्रति वैराग्यं नागच्छति, पर्यन्तं भगवतः लीलाकथादिकं श्रवणं कीर्त्तनं प्रति श्रद्धा नागच्छति तावत् पर्यन्तं विधिनिषेधपूर्वकं कर्माणि कर्त्तव्यानि भवन्ति। ततः स्ववर्णे आश्रमे स्थित्वा अनुकूलधर्मे रताः भवेयुः। कामनादि विरहितः सन् यज्ञादि आचरणपूर्वकं निषिद्धकर्मतः दूरे स्थित्वा विहितानि कर्माणि अनुष्ठानेन मानवः नरकं प्रति न याति। स्वधर्मे रतान् जनान् पापं न स्पृशति। इहलोके ते जनाः विशुद्धं ज्ञानमर्जयन्ति, तथा अनायसेन भगवतः सान्निध्यं प्राप्नुवन्ति।

सर्वे देवाः अपि मनुष्यजन्म प्राप्तुं कामयन्ते। ज्ञानमार्गस्तथा कर्ममार्गनिमित्तं मानवशरीरं साधनस्वरूपं विद्यते। यतोहि स्वर्गनरकादिषु मोक्षप्राप्तिर्नभवति। विचारवान् मानवः कुत्रचित् शरीरं लब्धुं न वाञ्छति। अस्मिन् शरीररूपकवृक्षे जीवः खगरूपेण नीडं रचयित्वा तिष्ठति। यमस्य दूताः प्रत्यहं अस्य वृक्षस्य छेदने रताः भवन्ति। एतत् दृष्ट्वा ज्ञानवान् जनः विषयासक्तः न सन् स्वकर्मणि प्रवृत्तो भूत्वा भगवन्तमाराधयन्ति। ते एव पुरुषाः परमात्मनः तत्त्वं ज्ञात्वा शान्तात्मनः भवन्ति। मानवः यदा कर्म प्रति अनासक्तः भवति तस्य मनः योगमार्गे प्रवर्तते। असकृत् अभ्यासेन प्रयासेन योगाङ्गानुष्ठानेन आत्मानुसन्धानं कृत्वा चित्तं भगवति समर्पयति। इन्द्रियाणि आत्मवशेन कृत्वा योगीवत् समाचर्य विवेकवान् पुरुषः योगं प्रति उपैति। सांङ्ख्यादि शास्त्रेषु प्रकृतितः आरभ्य यानि तत्त्वानि प्रोक्तानि तेन क्रमेण सृष्टिं योगिभिः चिन्तयेत्।

सांसारिकविषयं प्रति अनासक्ताः निर्विर्णाः ते निरन्तरानुशीलनेन दौरात्म्यं मनसि त्यजति। यमनियमासनादीनां सर्वदा अभ्यासं कृत्वा उपासनया भक्तियोगमाध्यमेन परमात्मनः चिन्तनं करोति। भक्तियोगं विना अन्यः कोऽपि उपायः न विद्यते येन मानवः परमात्मनः सान्निध्यं प्राप्तुं शक्नुयात्। योगमाध्यमेनैव कर्मविगर्हितस्य कर्मणः प्रायश्चितः क्रियते। कर्म प्रति अनासक्तः सन् विविधेषु

भक्तिमार्गेषु निरन्तरं भगवतः चिन्तनं कर्तव्यं भवति। दानधर्मतपज्ञानवैराग्यमाध्यमेन यत् फलं प्राप्यते तत् सर्वं भक्तियोगेन अनायसेन साधयितुं शक्यते। अतः भगवतः सान्निध्यनिमित्तं मार्गत्रयं प्रशस्तं विद्यते।

**बोधप्रश्नः**

१. ज्ञानयोगस्य अधिकारिणः के भवन्ति ?

२. भगवतः के प्रियाः भवन्ति ?

३. कस्मिन् मार्गे निरन्तरं प्रयासरताः सर्वे भवेयुः ?

## सारांश:

भगवान् श्रीकृष्णः आदौ हंसरूपेण भगवतः ब्रह्मणः चतुर्भ्यः पुत्रेभ्यः विविधान् उपदेशान् ददौ। यद्यपि चत्वारः युगाः भवन्ति, परन्तु युगानुगुणं विविधानां परिवर्तनानां प्रक्रिया अत्र प्रतिपाद्यते। सत्ययुगे जनानां प्रवृत्तिः द्वापरे युगे भगवतः स्वरूपं तथा तत् परवर्त्तिकाले विविधानि रूपाणि अस्मिन् अध्याये प्रतिपादितानि विद्यन्ते। वैदिककाले यथा विविधानां वर्णानां जनाः आसन् तथा तेषां जनानां प्रवृत्तिः अवर्त्तत, तदत्रापि प्रतिध्वन्यते। चतुर्णामाश्रमाणां कर्त्तव्यानि तथा कर्माणि अत्र प्रतिपादितानि सन्ति। ज्ञानकर्मभक्तियोगानां स्वरूपं प्रतिपादितं विद्यते। भगवत्प्राप्तेः साधनरूपेण ज्ञानकर्मभक्त्यादीनां विवेचनं विहितमस्ति। ज्ञानिनः सर्वे स्व तपसा ज्ञानवलेन च भगवन्तं धारयन्ति, परन्तु एतेषु त्रिविधेषु साधनेषु भक्तियोगिनः अनायसेन भगवतः सान्निध्यं प्राप्नुवन्ति। अनन्यभक्त्या एव भगवतः सान्निध्यं प्रति यः गच्छति, सः भगवतः प्राप्तिः अवश्यं करिष्यति।

## आदर्शप्रश्नाः

**लघूत्तरीयप्रश्नाः**

१. ब्राह्मणादीनां कर्माणि।

२. भक्तियोगस्य स्वरूपम्।

३. भगवत्प्राप्तेः साधनानि।

**विश्लेषणात्मकप्रश्नाः**

१. समेषां समानधर्माः प्रतिपादयत।

२. ब्रह्मचारिणः कर्त्तव्यानि निरूपयत।

३. आश्रमधर्मं निरूपयत।

**निबन्धात्मकप्रश्नाः**

१. समेषामाश्रमाणां स्वरूपं विशदयत।

२. ज्ञानकर्मणोः भक्ति कथं श्रेष्ठा प्रतिपादयत।

**एकाङ्कप्रश्नाः**

१. दानप्रतिग्रहणं कस्य धर्मो विद्यते ?

२. राज्यरक्षणं कस्य धर्मो विद्यते ?

३. भगवतः नाभिकमलात् कः जज्ञे ?

४. ब्रह्मचारी कुत्र तिष्ठति ?

५. कया भगवतः सान्निध्यं प्राप्तुं शक्यते ?

६. कः मार्गः भगवत्प्राप्तये श्रेष्ठः ?

७. के तपसा भगवन्तमाराधयन्ति ?

८. निषिद्धकर्मणामाचरणे जन: कुत्र पतति ?

९. विधिनिषिद्धपूर्वकं कानि कर्त्तव्यानि भवन्ति ?

१०. कति योगा: भवन्ति ?

११. क: योग: श्रेष्ठ: ?

१२. क: धर्म: श्रेष्ठधर्म: ?

**उत्तराणि**

१. ब्राह्मणस्य २. क्षत्रिय: ३. ब्रह्मा ४. गुरुगृहे ५. भक्त्या ६. भक्तिमार्ग:

७. ज्ञानिन: ८. नरके ९. कर्माणि १०. त्रय: ११. भक्तियोग: १२. मोक्ष:

# सप्तमोऽध्याय:

**प्रस्तावना –**

पुराणानां पञ्चलक्षणदिशा पुराणेषु सृष्टिप्रक्रिया तथा प्रलयस्य निरूपणं प्राधान्येन विधीयते। अत: सर्गस्य वर्णनं तथा विविधानाम् अण्डजस्वेदजजरायुजादीनामपि अवश्यं वर्णनं भवेत्। तदर्थं भगवत: मुखकमलात् अस्य जगत: सत्ता तथा प्रकृत्या: आधारेण जगत: उत्पत्ते: स्थितेस्तथा विनाशस्य च यानि तत्त्वानि अररीकृत्य प्रवर्त्तन्ते तानि संक्षेपेणे विधीयन्ते। श्रीमद्भगवद्गीतायां यदुक्तं **नास्ति सांख्य समं ज्ञानं** इति हेतो: सांख्यस्य विषय: अत्र प्रतिपाद्यते। विविधानां तत्त्वानां संख्याविषये तथा मतभेदोऽपि अत्र विचार्यते। येन कस्यापि शङ्का न भविष्यति।

**उद्देश्यानि –** सर्वे पाठका: अस्मिन् अध्याये एतान् विन्दून् पठिष्यन्ति

- **गुणदोषव्यवस्थाया: स्वरूपं रहस्यं च**
- **तत्त्वानां संख्या**
- **गुणानां स्वरूपम्**
- **प्रकृतिपुरुषयो: विवेक:**
- **सहिष्णुव्राह्मणोपाख्यानम्**
- **सुखदु:खयो: कारणम्**
- **सांख्ययोग**
- **गुणत्रयाणां वृत्तिनिरूपणम्**
- **गुणानां स्वरूपम्**

**गुणदोषव्यवस्थाया: स्वरूपं रहस्यं च**

ज्ञानकर्मभक्तियोगात्मकमार्गत्रयं विहाय अन्येषु मार्गेषु ये प्रयत्नरता: भवन्ति ते जन्ममृत्युवन्धने संसरन्ति। स्वस्य अधिकारे दृढ़निष्ठ: गुण: इति परिकीर्त्तित:, अन्यस्य अधिकारे निष्ठ: दोष: इति कथ्यते। अधिकारानुगुणं गुणदोषस्य विवेचनं विधीयते। तत्त्वदृष्ट्या सर्वाणि द्रव्याणि समानानि भवन्ति। तथापि कर्त्तव्याकर्त्तव्यपवित्रापवित्रगुणदोषशुभाशुभादय: ये सन्ति तेषामुद्देश्यं विचिकित्सार्थ विद्यते। शुद्धाशुद्धस्य निर्णय: धर्मं नीत्वा क्रियते। धर्मार्थं व्यवहारार्थं यात्रार्थं च एतासां व्यवस्थानां विधानं विहितं वर्तते। भूम्यम्बुग्न्यनिलाकाशादीनि पञ्चभूतानि धातव: सर्वे आब्रह्मस्थावरादीनां शरीरा: आत्मसंयुता: भवन्ति। नियमार्थं हि देशकालादिभावानां वस्तूनां गुणदोषौ विधीयेते।

अब्राह्मणदेशस्तथा अकृष्णसारदेश: अपवित्र इति मन्यते। सज्जनरहित: देश: भूमिश्च अशुद्धो भवति। यदा यज्ञसाधनार्थं सर्वाणि द्रव्याणि लभ्यन्ते स: समय: सर्वोत्कृष्टसमय: वर्तते। यदा न लभ्यते स: समय: अशुभसमय: वर्तते। द्रव्यवचनसंस्कारकालादिभि: शुद्धि: क्रियते। सामर्थ्यासामर्थ्याबुद्धिवैभवानुसारेण पवित्रताऽपवित्रताया: विधानं विधीयते। अनेन प्रकारेण देशकालपदार्थकर्तामन्त्रकर्मादय: शुद्धे सति धर्म: अशुद्धे अधर्मो भवति।

क्वचित् गुणोऽपि दोष: भवति यदि स: विधिना दोष: इति मन्यते। विपरीते अपि दोषवाक्यं विधौ यदि निर्देश: भवति तर्हि सो गुणायते। पतितानां कृते समानकर्माचरणं पातकमिति चिन्त्यते। यतो यतो मानव: गुणदोषाभ्यां निवर्त्तेत ततस्तत: स: कर्मसंसारवन्धनात् विमुच्यते। एष: धर्म: नृणां क्षेमप्रदं भवति। विषयेषु गुणाध्यासात् आसक्ति: उत्पद्यते। तस्मात् सङ्गात् काम: जायते, कामत: कलि: नृणां भवति। कले: क्रोध: दुर्विषह: भवति, तत: चेतनाशक्ति: लुप्ता भवति। चेतनाशक्तिविरहित: जन: शून्याय कल्प्यते। स: अनन्तरं मूर्च्छित: मृतो वा भवति।

बोधप्रश्ना:

१. क: जन: शून्याय कल्प्यते ?

२. क: देश: अपवित्र: मन्यते ?

३. केनाधारेण गुणदोषौ विधीयेते ?

**कर्मकाण्डज्ञानकाण्डोपासनाकाण्डादीनि**

स्वर्गादिलोके यानि सुखानि लभ्यन्ते ऐश्वर्याणि च श्रूयन्ते तत् स्वप्न इव अशास्वतं दु:खजनकं भवति। तदर्थं जना: सत्त्वरजतमगुणै: आकृष्टा: सन्त: देवानामभीष्टानि द्रव्याणि स्वीकृत्य उपसनां कुर्वन्ति। इहलोके यज्ञद्वारा सर्वं साधयितुं शक्यते। वेदे काण्डत्रयं प्रतिपादितं विद्यते। ज्ञानकाण्डं कर्मकाण्डमुपासनाकाण्डञ्च। एतेषु काण्डत्रयेषु प्रतिपाद्यविषया: भवन्ति ब्रह्मात्मनो: सम्बन्धैक्यम्। वेदा: शब्दब्रह्मरूपेण प्रोच्यन्ते। वेदा: भगवत: विष्णो: मूर्त्तय: भवन्ति। स: शब्दब्रह्म परापश्यन्तीमध्यमारूपेण प्राणमनस्तथेन्द्रियमयम्। ते च वेदा:  ब्रह्मण: अनन्तशक्तिना सर्वभूतेषु घोषरूपेण विसेषूर्णेव लक्ष्यन्ते। सर्वाण्यक्षराणि सर्वे च वर्णा: छन्दांसि ॐकारादेव स्वरव्यञ्जनेष्मस्पर्शरूपेण विद्यन्ते। तस्मादपि विचित्रा: भाषा: प्रादुरभवन्। ते च वेदा: ज्ञानकाण्डे किं कर्त्तव्याकर्त्तव्यं ज्ञानं विदधत्ते। कर्मकाण्डे विविधानां कर्मणां विधानं विदधत्ति। उपासनायां केषां देवानां वर्णनं केषु स्थलेषु विद्यते तत् प्रदर्शयन्ति ।

बोधप्रश्न:

१. वेदेषु प्रतिपादितानि त्रीणि काण्डानि कानि कानि विद्यन्ते ?

२. ज्ञानकाण्डे किं विधत्ते ?

**तत्त्वानां संख्या**

प्रपञ्चे विद्यमानानां तत्त्वानां संख्या विषये विविधेषु स्थलेषु विविधाः ऋयषः विविधानि मतानि स्वीकृत्य स्वीयमतं प्रस्तुवन्ति। केचन अष्टाविंशतिः, केचन पञ्चविंशतिः केचन षड्विंशतिः, केचन सप्ततत्त्वानि , केचन नव, केचन सप्तदशतत्त्वानि इति प्रतिपाद्य सर्वे विवदन्ते। सर्वे भगवतः मायायां यानि तत्त्वानि वर्त्तन्ते तानि भिन्न भिन्नरूपेण प्रतिपादयन्ति। सर्वे सत्त्वरजतमसां गुणानां रहस्यं ज्ञातुं न शक्नुवन्ति। यदि ते स्वस्य मतानुगुणं संसारस्य विषये किमपि मतपोषणं कुर्वन्ति तर्हि तत् वादविवादाय प्रवर्तते। जगत् इति किमपि न विद्यते। सत्त्वादिगुणेषु यदा क्षोभः भवति जगतः अस्तित्वं प्रतिभासितं भवति। यदा इन्द्रियाणि संयतानि भवन्ति मनः स्थिरं भवति, तदानीं भेदबुद्धेः वितृष्णा उपजायते। तदानीं वादः अनुशाम्यति। वक्ता पौर्वापर्यप्रसंख्यानं कृत्वा परस्परानुप्रवेशात् तत्त्वानां संख्या वदति। ये जनाः षड्विंशति इति वदन्ति, ते प्रकृतेः कार्यकारणरूपेण चतुर्विंशतिः तथा पुरुषेश्वरयोः संयोगं कृत्वा षड्विंशतिः इति कथयन्ति। एतेषां मते जीवः अनादिकालादेव अविद्यायां ग्रस्तो भूत्वा तिष्ठति अतः जीवेश्वरयोः भेदः वर्तते, परन्तु ये पञ्चविंशतिः इति स्वीकुर्वन्ति ते जीवेश्वरयोः भेदं न स्वीकुर्वन्ति। गुणत्रयाणां साम्यावस्था प्रकृतिः भवति। सत्त्वरजस्तमांसि प्रकृत्याः गुणाः न तु आत्मनः गुणा भवन्ति। अस्मिन् प्रसङ्गे सत्त्वोगुणः ज्ञानस्वरूपः रजोगुणः कर्मस्वरूपः तथा तमोगुणः अज्ञानस्वरूपः भवति। एतेषां गुणानां क्षोभादेव जगतः सृष्टिस्थितिलयादयः भवन्ति। गुणव्यतिकररूपेण कालः सूत्रं तथा महत् स्वभावत्वेन कथ्यते।

यदि एतान् गुणान् प्रकृतितः भिन्नमिति कथ्यते तर्हि एतेषां तत्त्वानां संख्या अष्टाविंशतिः भवति। सृष्टेः प्रारम्भे प्रकृतिः कार्यकारणरूपेण विद्यमाना वर्तते। सत्वादीनां गुणानां सहायेन प्रकृतिः जगत् सृजति। परन्तु अव्यक्तः सन् पुरुषः प्रकृतेः तथा तस्याः कार्याणां साक्षीत्वेन तिष्ठति। परन्तु ये तत्त्वानां

सप्तैव कथयन्ति ते पञ्चमहाभूतानि जीवपरमात्मनोः सत्तामङ्गीकुर्वन्ति। षड्तत्त्ववेतारः पञ्चमहाभूतैः सह इश्वरस्य सत्तामङ्गीकुर्वन्ति। एवं रूपेण भिन्नं भिन्नं मतं पुरस्कृत्य सर्वे कस्यचित् स्वीकारं कृत्वा अन्यस्य विपरीतरूपेण ग्रहणं कृत्वा तत्त्वानां संख्यानिर्णयविषये विवदन्ते।

**बोधप्रश्नः**

१. गुणत्रयाः के के भवन्ति ?

२. क्षोभः कस्मात् कारणात् जायते ?

३. पञ्चविंशतितत्त्वानि कानि कानि विद्यन्ते ?

**प्रकृतिपुरुषयोः विवेकः**

प्रकृतौ पुरुषः तथा लीयते येन अनयोः स्वतन्त्रसत्ता ग्रहीतुं न शक्यते। परन्तु प्रकृतिपुरुषयोः आत्माशरीरयोः मध्ये महान् प्रभेदः वर्तते। प्रकृतिः त्रिगुणात्मिका, या च गुणैः विविधान् भ्रमान् प्रतिपादयति। यद्यपि प्रकृतेः सृष्टि असीमिता वर्तते तथापि वैकारिकत्वेन अध्यात्माधिदैवाधिभूतत्वेन सृष्टि त्रिविधा भवति। नेत्रं भवति अध्यात्मं, तस्य विषयः रूपं भवति अधिभूतं तेन नेत्रगोलकेन स्थितस्य सूर्यस्य अंशः अधिदैवं। एतानि त्रीणि परस्परयोः आश्रयदातारः भवन्ति। परन्तु आकाशे स्थितः सूर्यः एतयोः द्वयोः भिन्नो विद्यते। आत्मा एव तस्य स्वयंसिद्धज्योतिमाध्यमेन सर्वान् पदार्थान् आलोकयति, साक्षीरूपेण तिष्ठति। प्रकृतितः महत्तत्त्वस्य विकारो भवति, ततः अहङ्कार उत्पद्यते। अहङ्कारस्य वैकारिकतैजसतामसत्वेन भेदाः भवन्ति। अहङ्कार एव सृष्टेः अज्ञानस्य विविधतायाः मूलकारणं वर्तते। परन्तु आत्म ज्ञानस्वरूपः, आत्मनः प्राकृतिकपदार्थैः सह सम्बन्धाभावः वर्तते।

संस्कारानुगुणं भोगलाभार्थं मनः इन्द्रियादिभिः सह सम्मील्य लिङ्गशरीरं विसर्जति। लिङ्गशरीरमेव एकस्मात् शरीरात् अन्य शरीरं प्रति गृह्णाति। एकस्मात् लोकात् अपरं प्रति याति।

**बोधप्रश्नः**

१. लिङ्गशरीरस्य कति अवयवाः भवन्ति ?

२. अहङ्कारःकस्मात् जायते ?

३. अस्य अहङ्कारस्य कति भेदाः सन्ति के च ते भवन्ति ?

**सहिष्णुब्राह्मणोपाख्यानम्**

दुर्जनानां कटुवाक्यानि श्रुत्वा अस्मिन् लोके स्थितप्रज्ञरूपेण प्रायशः न्यूनाः जनाः दरीदृश्यन्ते।ः कटुवाक्यानि तथा तप्यन्ते यथा वाणैः विद्धः पुमान् न तप्यते। अस्मिन् विषये प्राचीनकाले मर्मज्ञाः कथामेकां श्रावयन्ति। कदाचित् अवन्तिषु कश्चित् दाढ्यतमः वार्तावृत्तिः कदर्यः कामी लुब्धश्च ब्राह्मणः आसीत्। सर्वेऽपि ज्ञातयः अतिथयः तस्य वाङ्मनसा नार्च्चिताः विद्यन्ते। तस्य स्वभावः कृपणः कुत्सितश्च आसीत्। सर्वे पुत्रवान्धवाः दारा दुहितरो भृत्याः विषण्णा सन्तः तस्य प्रियमाचरणं न अकुर्वन्। न कश्चित् तं ब्राह्मणं सुष्टु व्यवहरति स्म। तस्य धर्मकामविहीनस्य इहलोके परलोके च पतनमभूत्। सर्वे पञ्चमहायज्ञस्य देवाः क्रमेण धर्मकामहीनकारणात् चुक्रुधुः। सः कृपणो यानि धनानि एकत्रीकृतवान् तानि सर्वाणि क्रमेण नष्टानि जातानि । सर्वे पुत्रादयः वान्धवाः धनं जगृहुः। किञ्चित् धनं दस्यवः अपि कालेनापि जगृहुः। अवशिष्टानि धनानि करदण्डरूपेण राजा शासकवर्गाश्च स्वीकृतवन्तः। एवं च द्रविणे नष्टे सर्वे स्वजनाः अस्य ब्राह्मणस्य उपेक्षां चक्रुः। धननाशकारणात् तस्य विप्रस्य मनसि दुःखमजायत। अतः क्रमेण वाष्पकण्ठयुक्तः सन् सांसारिकमोहमायातः विषिण्णो बभूव। कष्टेन अर्जितं धनं न धर्माय न कामाय अभूत्, वृथा धनमहमयास इति चिन्तयामास। परन्तु प्रायेण कदर्याणां धनं न सुखाय न च

धर्माय भवति, केवलं मृतस्य नरकस्य कृते तथा आत्मोपतापाय प्रवर्तते। यशश्विनां यशः गुणिनां गुणाः लोभवशात् तान् हन्ति, यथा श्वित्रः इप्सितं रूपं प्रति कदर्यं भवति। अर्थस्य साधने सिद्धे उत्कर्षे परिरक्षणे व्यये च नाशोपभोगनिमित्तं भ्रान्तिः केवलं लभ्यते। स्तेयहिंसानृतदम्भकामक्रोधस्मयमदभेदवैरमविश्वाससंस्पर्धादयः पञ्चदशदोषाः धनादेव प्रवर्तन्ते। अतः कल्याणकामी पुरुषः स्वार्थस्तथा परमार्थस्य विरोधं कृत्वा दूरे भवेत्। भ्रातरः दाराः पितरः सुहृदः एकास्निग्धाः सन्तः अपि धनमादाय सर्वे भिद्यन्ते। अल्पीयसा अर्थेन ह्येते दीप्तमन्यवः भूत्वा सौहृदं घ्नन्ति। मनुष्यस्य शरीरं मोक्षस्तथा स्वर्गस्य द्वारसदृशो विद्यते, परन्तु सर्वे द्रविणे अनुरक्ताः सन्तः स्वकर्मणि प्रवृत्ताः न भवन्ति। यः जनः देवर्षिपितृभूतानि ज्ञातीन् वन्धूंश्च असंविभज्य चात्मनः कृते धनं संरक्षति सः यक्षः यथा वित्तस्य रक्षणे सहायको भवति तथा कृपणः इव चरति।

सः ब्राह्मणः भ्रान्तः सन् सर्वं व्यर्थया तत्याज। अस्मिन् वृद्धकाले कथं शुभकर्मणि धनं विनियोजयामि। विद्वान् अपि व्यर्थया अर्थे संक्लिश्यते। सुविमोहितः सन् सर्वे धने अनुरक्ताः भवन्ति। अनेन ब्राह्मणस्य मनसि संसारस्य प्रति वितृष्णाभावः समायातः। ततः सः वैराग्यं प्रति समागतो वर्तते। ततः सः चिन्तयामासः यदि किञ्चित् क्षणमितोपि जीवामि तर्हि आत्मसन्तुष्टिं लब्ध्वा परमार्थे लीनो भूत्वा तपः आचरामि। यतोहि राजा खट्वाङ्गः अपि मुहूर्त्तेन ब्रह्मलोकं जगाम।

सः ब्राह्मणः मनसि सर्वं खेदं त्यक्त्वा संकल्पितः सन् मनसि अहंत्व-ममत्ववन्धनात् विमुच्य शान्तमनसा मौनी सन्न्यासी अभूत्। कस्यचित् प्रति तस्य मनसि आसक्तिर्नासीत्। हृदयग्रन्थीन् उन्मुच्य इन्द्रियाणि संयम्य भिक्षार्थं नगरग्रामान् असङ्गोऽलक्षितो भूत्वा अविशत्। तं प्रवयसं ब्राह्मणं सर्वे निन्दां चक्रुः। केचित् तस्य दण्डं केचित् पात्रं कमण्डलुं केचित् कन्थां च जगृहुः। केचन तं प्रति भिक्षाद्रव्याणि प्रक्षेपयन्तः आसन्। केचन पापिष्ठाः तं प्रति मूत्रयन्ति, ष्ठीवन्ति च। केचन ताडयन्ति केचन वाचयन्ति

परन्तु सः किमपि न वक्ति। सः ब्राह्मणः मौनवत् सर्वं दृढ़निश्चयेन वकवत् साधयति। केचत विहसन्ति केचन पुनः दुर्वातयन्ति, तं द्विजं सर्वेऽपि क्रीडनकमिति चिन्तयामासुः। सः ब्राह्मणः सर्वं भौतिकं दैविकं दैहिकं दुःखं प्राप्तवान्। ततः अपि स्वधर्मे धृतिमास्थाय भगवतः गाथामगायत। संसारे न कश्चित् कस्मैचित् दुःखं ददाति, न च सुखं ददाति। एतत् सर्वं मनसः भ्रममात्रम्।

**बोधप्रश्नः**

१. श्रीकृष्णः उद्धवं प्रति कस्य आख्यानं कथयामास ?

२. सुखदुःखादीनि कस्य धर्मो भवति ?

३. ब्राह्मणस्य धनं के अहरन् ?

**सुखदुःखयोः कारणम्**

सर्वे च जनाः स्वस्य कर्माणि यथा कुर्वन्ति तदनुसारं फलभाजः भवन्ति। सुखदुःखं च कर्मानुसारं लभ्यते। पकृतपक्षे गुणत्रयाणामाधारेण बुद्धेः कलुषता आगच्छति। एतस्मात् कारणादेव मनुष्यः तमसि भ्रमति। यदि सुखदुःखयोः हेतोः कारणं मनुष्यः चेत् सुखदुःखाभ्यां सह आत्मनः कः सम्बन्धो विद्यते। सुखदुःखयोः कारणं मानवः स्वयं भुङ्क्ते। क्वचित् जिह्वा स्वदद्भिः संदशति चेत् वेदनायां कतमाय कुप्येत्? पुनः दुःखस्य हेतवः यदि देवाः भवन्ति तर्हि आत्मना सह अस्य कः सम्बन्धः? सर्वेषामिन्द्रियाणां स्वामी एक एव। इन्द्रियाणां स्मामी यदि अपरस्य इन्द्रियस्य कृते हानिः करिष्यति, चेत् आत्मनः को दोषः ? यत् एकमङ्गं अन्येन अङ्गेन निहन्यते तर्हि दोषः कस्य वा भवति।

यदि आत्मा एव सुखदुःखयोः कारणमिति मन्येत तर्हि आत्मा स्वयं न शरीरात् अपरः। तर्हि कदाचिदपि आत्मा सुखदुःखयोः कारणं न भवति। आत्मा नित्यानन्दस्वरूपः। आत्मनि सुखदुःखादीनि

न भवन्ति। ग्रहा: अपि सुखदु:खयो: कारणभूता: न भवितुं शक्नुवन्ति। यतोहि ग्रहा: केवलं पीडादायका: भवन्ति, तर्हि ग्रहस्य प्रभाव: शरीरस्योपरि भवति न तु आत्मन: उपरि अस्य प्रभावो विद्यते, आत्मा नित्यचिरन्तनशास्वतस्वरूप:। कर्म अपि यदि सुखदु:खयो: कारणं भवति तर्हि कर्मण: सम्बन्ध: तु शरीरेण साकं विद्यते न तु आत्मना सह विद्यते। जडचेतनयो: सम्बन्धेन कर्म सम्पाद्यते। अत: अनेन सह आत्मन: सम्बन्धो न विद्यते। पुन: यदि सुखदु:खयो: कारणं कालो भवति तर्हि कालात्मनो: परस्परसम्बन्धो न विद्यते। आग्निं यथा स्वताप: न वाधते तथैव हिमस्य शीतलता यथा हिमं न वाधते तथैव आत्मनि सुखदु:खयो: द्वन्दो न भवति। आत्मा त्रिगुणातीतो वर्तते। आत्मा कुत्रचिदपि सुखदु:खयो: द्वन्दं न सहति। अत: पूर्वकाले ऋषय: आध्यात्मनिष्ठाया: आश्रयं स्वीकृतवन्त:।

**बोधप्रश्न:**

१. त्रिगुणातीत: को वर्त्तते ?

२. सुखदु:खाभ्यां सह कस्य सम्बन्धो विद्यते ?

## सांख्ययोग

प्राचीनकाले ब्रह्मविद्भि: य: सांख्ययोग: प्रोक्त: तत् ज्ञानं लब्ध्वा पुमान् सद्य: वैकल्पिकं भ्रमं जह्यात्। नानात्वेन प्रतिभासितसत्तां न विश्वसिति। कल्पस्य प्रारम्भे किमपि तत्त्वं ज्ञानज्ञेयरूपेण नासीत्। तस्मिन् समये अद्वितीयरूपेण केवलमेकमात्रं तत्त्वमासीत्। पुरा सत्ययुगे सर्वे विवेकनिपुणा: आसन्, तथा सर्वेषु ब्रह्मदृष्टिरासीत्। तत: निर्विकल्पितं वाङ्मनोऽगोचरं सत्यं ब्रह्म तथा मायारूपेण प्रतिविम्वित: सन् दृश्यद्रष्टात्वेन द्विधा समभवत्। तयो: एका उभयात्मिका प्रकृति, या कार्यकारणरूपेण आसीत्।

अन्यतमः भवति ज्ञानस्वरूपः जीवात्मा पुरुषः । सत्त्वरजस्तमांसि प्रकृत्याः त्रिगुणाः भवन्ति। एतेषु गुणेषु क्षोभः जायते। तस्मात् प्रक्षोभ्यमाणायाः प्रकृत्याः सकाशात् क्रियाशक्तिप्रधानसूत्रं तथा ज्ञानशक्तिप्रधानं महत्तत्त्वं जज्ञे। महत्तत्वस्य विकारकारणतः अहङ्कारः अजायत। अयमहङ्कारः सर्वान् विमोहनं करोति। अयमहङ्कारः त्रिविधः सात्त्विकराजसिकतामसिकभेदात्। अयमहङ्कारः पञ्चतन्मात्राणामिन्द्रियाणां तथा मनसः कारणम्। अहङ्कारस्य तामसगुणात् पञ्चतन्मात्राणि उत्पन्नानि अभूवन्। ततः पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानि अजायन्त। अहङ्कारस्य राजसिकगुणात् इन्द्रियाणि जातानि। ततः सात्त्विकवशात् मनसः उत्पन्नोऽभूत्। एते सर्वे एकत्रीताः सन्तः ब्रह्माण्डाख्यमण्डमुत्पादयामासुः। तस्मिन् अण्डे सलिलसंस्थितौ नारायणः समभवत्। नारायस्य नाभ्यामभूत् पद्मं तस्मात् ब्रह्मणः आविर्भावः जातः। ब्रह्मा बहुतपस्यां कृत्वा सकलान् लोकान् लोकपालान् च भगवदनुग्रहात् ससर्ज। देवानां निवासस्थानस्वर्लोकं तथा भूतप्रेतादीनां भुवर्लोकस्तथा मानवानां भूर्लोकः वर्तते। ततः त्रिलोकानामुपरि सिद्धानां निवासार्थं महतपादि विविधान् लोकान् ब्रह्मा ससर्ज। अधोभागे असुराणां नागानां पृथिव्यामधः अतलवितलसुतलादि सप्तलोकान् ससर्ज। त्रिगुणात्मककर्मानुगुणं जीवेभ्यः विविधाः गतयः भवन्ति। योगतपस्यासन्न्यासादीनां समाचरणेन महजनतपसत्यादिलोकाः लभ्यन्ते। परन्तु भक्तियोगेन भगवतः विष्णोःपरमधाम यान्ति। कर्मयुक्तमिदं जगत् कर्मसंस्कारेण सह संश्लिष्टो वर्तते। अस्मिन् गुणप्रवाहे पतित्वा जीवः कुत्रचित् उन्मज्जति तथा कुत्रचित् निमज्जति। अणुर्बृहत् कृशः स्थूलो यः प्रसिद्ध्यति तत् सर्वं प्रकृतिपुरुषयोः संयोगादेव जायते। वस्तुनः आद्यन्ते यत् विद्यते तत् सर्वं तस्य मध्ये अपि विद्यते, व्यवहारार्थं विविधानां विकारेषु विविधानि उत्पन्नानि भवन्ति। यस्य आदिरन्तः विद्यते तत् कार्यं सत्यमित्यभिधीयते।

अस्य प्रपञ्चस्य उपादानं कारणं भवति प्रकृतिः तथा एतस्याः प्रकृतेः आधारो भवति पुरुषः। अस्य अभिव्यञ्जकः कालः। प्रलयकाले सर्वे आत्मनः प्रकृतौ विलीयन्ते। प्राणिनां शरीरमन्ने लीनो भवति, अन्नं वीजे विलीयते। वीजं भूमौ तथा भूमि गन्धतन्मात्रे लीयते। एवं रूपेण सर्वे स्वस्य कारणेषु भवन्ति। ततः इन्द्रियाणि अहङ्कारे लीयन्ते। अहङ्कारः महत्तत्वे तथा महत् प्रकृतौ विलीयते। परन्तु आत्मा न लीयते। एवमान्वीक्षमाणस्य वैकल्पिको भ्रमः न जायते। भगवान् कार्यकारणयोः साक्षी। पुरुषः स्वस्य स्वरूपे प्रतिष्ठितो भवति। अयं सांख्यविधिः अतीव सरलो विद्यते। यस्य अवगमने विविधानां सन्देहानां मोचनं भवति।

**बोधप्रश्नः**

१. देवानां निवासस्थानं कुत्र अस्ति ?

२. प्रलयकाले सर्वे कुत्र विलीयन्ते ?

३. प्रकृतिः प्रपञ्चस्य कीदृशं कारणं भवति ?

**गुणत्रयाणां वृत्तिनिरूपणम्**

प्रपञ्चे सर्वेषां जनिमतां विविधप्रकाराणां प्रवृत्तिः उपजायते। विविधेषु जनेषु विविधानां गुणानामाधारेण स्वभावः दृश्यते। सत्त्वगुणस्य वृत्तयः भवन्ति शमो दमस्तितिक्षा तपः सत्यं दया स्मृतिः तुष्टिः त्यागः विषयेषु अनासक्तः श्रद्धा लज्जा आत्मरतिः दानं विनयः सरलता इत्यादयः। एवं रूपेण रजोगुणस्य अपि वृत्तयः इच्छाप्रयत्नगर्वतृष्णास्तम्भाशीर्भिदासुखमदोत्साहयशप्राप्त्यानन्हास्यपराक्रमादयः सर्वे भवन्ति। तमोगुणस्य क्रोधलोभमिथ्याभाषणकलहश्रमशोकमोहविषाददीनता-निद्राऽशाभयाकर्मण्यतायाचनापाषाण्डतादयः वृत्तयः विद्यन्ते। एताः सर्वाः वृत्तयः प्रायेण भिन्नरूपेण

भगवता प्रोक्ता: वर्तन्ते परन्तु व्यवहारसन्निपाते एतेषां गुणानां तारतम्यो भवति। सात्त्विकराजसिकतामसिकरूपेण गुणानां मिश्रणादेव क्रियाया: तथा धर्मार्थकामादय: परिनिष्ठिता: भवन्ति। गुणानां सन्निकर्षादेव सत्त्वगुणात् श्रद्धा, रजोगुणात् रति: तथा तमोगुणात् धनप्राप्तिर्भवति। एते सर्वे गुणानां सम्मिश्रणादेव भवन्ति। गुणानां समावेशादेव सकामधर्माचरणे तथा गृहस्थकार्येषु दृढ़निष्ठरूपेण कार्यं सम्पादयति। मानसिकशान्तिस्तथा जितेन्द्रियकारणत: सत्त्वगुणयुक्तपुरुषं कामनादिभि: रजोगुणयुक्तपुरुषं क्रोधहिंसादिभि: तमोगुणयुक्तं पुरुषं विद्यात्। निष्कामरूपेण य: सकलानि नित्यनैमित्तिककार्याणि सम्पादयति, तथा भगवत: आराधना नित्यं करोति स: सत्त्वगुणी भवति। सकामरूपेण भगवत: आराधनां य: करोति स: रजोगुणी भवति। शत्रून् हननार्थं य: भजति स: तमोगुणी भवति।

**बोधप्रश्न:**

१. सत्त्वगुणस्य वृत्तय: के के भवन्ति ?

२. तमस: स्वभाव: क: ?

३. रजोगुणी केन प्रकारेण भगवत: आराधनं करोति ?

## गुणानां स्वरूपम्

सत्त्वगुणं लघुप्रकाशकं भास्वरं तथा ज्ञानज्योतिप्रदायको भवति। निर्मलशान्तश्चास्य सत्त्वगुणस्य स्वभावो वर्तते। अयं गुण: रजोगुणं तथा तमोगुणं घातयित्वा यदा प्राप्ति: भवति तदा धर्मज्ञानादिभि: पुमान् युज्यते। रजोगुणं विविधभेदबुद्धे: कारणम्। आसक्तिप्रवृत्तिश्चास्य गुणस्य कारणं विद्यते। यदा तदितरौ गुणौ नाशयित्वा अस्य गुणस्य उद्रेको भवति तदा दुखेन कर्मणा यशसा श्रिया च युज्यते।

तमोगुण्य स्वरूपं भवति अज्ञानम्। आलस्यं तथा बुद्धे मालिन्यता अस्य गुणस्य स्वभावो विद्यते। यदा तमः जयते तदा शोकमोहाभ्यां निद्रया हिंसयाऽऽशया च युज्यते। तदानीं सः निद्रालस्ये लीनः सन् शेते।

चित्तः प्रसन्नः, इन्द्रियाणि च आसक्तानि न भवन्ति, मनसि भयः न युज्यते, तत् सत्त्वं तथा भगवत्पदस्य साधनमिति विद्धि। यदा कर्मक्षेत्रे बुद्धिचञ्चलं भवति ज्ञानेन्द्रियाणि आसक्तानि, विकारयुक्तानि च भवन्ति, तदा रजोगुणस्य वृद्धिर्भवति इति जानीयात्। यदा ज्ञानेन्द्रियाणि दुःखितानि सन्ति मनसि विषादः उपजायते मनः निष्क्रियतां प्रति याति तदा तमोगुणस्य वर्धनं भवति इति जानीयात्। सत्त्वगुणे एधमाने देवानां वलमेधते, रजसि असुराणां तथा तमसि रक्षसां वलं वर्धते। सत्त्वेन गुणेन जागरणं रजसा स्वप्नं तथा तमसा सुषुप्तिः जायते इति विद्यात्। सत्त्वेन गुणेन जनाः ब्राह्मणाः उपर्युपरि गच्छन्ति, तमसा अधोऽधः तथा रजसा मानवजन्मनि सीदन्ति। सत्त्वे प्रलीने स्वर्गलोकं यान्ति रजोगुणस्य समये प्रलीने मर्त्त्यलोकं प्रत्यावर्त्तन्ते, तमोगुणे विनाशे सति नरकं यान्ति।

निष्कामरूपेण यदि कर्म कृत्वा समर्प्यते तर्हि तत् कर्म सात्त्विकमिति प्रोच्यते। फलोद्देश्येन विधीयमानं कर्म राजसिकं भवति, तथा अन्येभ्यः दुःखं प्रदातुं यं कर्म क्रियते तत् तामसिकं भवति। आत्मानं शुद्धमिति ज्ञानार्थं यत् कर्म क्रियते तत् सात्तिकमपि भवति। आत्मज्ञानविषयकश्रद्धा भवति सात्त्विकं, कर्मविषयकश्रद्धा भवति राजसिकं तथा अधर्मविषयकश्रद्धा भवति तामसिकं। मनुष्यः अन्तर्मुखी भूत्वा आत्मचिन्तने यदा रतः भवति तदानीं तत् भवति सात्त्विकं सुखम्। वहिर्मुखी भूत्वा यत् प्राप्नोति तत् राजसिकं सुखं, अज्ञानात् दैन्यात् यत् सुखं प्राप्नोति तत् तामसिकं सुखम्। द्रव्यदेशकालफलज्ञानकर्मकर्त्तश्रद्धाऽवस्थादेवमानवतीर्यगादिशरीरस्तथानिष्ठा त्रिगुणात्मकाः एते विद्यन्ते।

जीवः संसारे गुणकर्मानुरोधेन योनिं प्राप्नोति, परन्तु मद्भक्तपरायणाः सर्वेऽपि भक्तियोगेन भगवतः आराधनां कृत्वा पुनः जन्म न लभ्यन्ते। अतः विचारवान् पुरुषः सर्वदा प्रशान्तमनसा सत्त्वगुणोपेतं सर्वं स्वीकृत्य तदितरौ त्यक्त्वा निवसेत्। ध्यानयोगेन चित्तवृत्तीन् उपशाम्य जीवः सर्वान् जयति। अनेन प्रकारेण अनन्यभक्तियोगेन अन्तःकरणे गुणान् अपि जित्वा भगवतः सान्निध्यं प्राप्नोति। तस्य पुनरागमनं कस्मिन् लोके न भवति, अविद्यादि दोषेषु मुक्तः सन् गुणरहितः सन् स्वर्गलोकं प्रति व्रजति।

**बोधप्रश्नः**

१. कदा मनसि विषादः उपजायते ?

२. सत्त्वोगुणोपेतः स्वभावः कीदृशो भवति ?

३. केन माध्यमेन भगवतः सान्निध्यं लभ्यते ?

## सारांश:

यद्यपि तत्त्वानि सर्वाणि समानानि विद्यन्ते तथापि नियन्त्रणदृष्ट्वा गुणदोषयोः विवेचनं कृतं विद्यते। दोषगुणात् विमुक्ते सति मानवः कर्मवन्धनात् प्रमुच्यते। पुनः अध्यायेऽस्मिन् विविधानां तत्त्वानां संख्या तथा विविधेषु शास्त्रेषु विविधानां तत्त्वानां या संख्याः विद्यन्ते ताः सर्वाः अपि चर्चिताः विद्यन्ते। प्रकृतिपुरुषयोः विवेकज्ञानात् मुक्तेः तथा भगवत्प्राप्तेः विषये प्रतिपाद्यते। सुखदुःखादयः शरीरस्य धर्माः भवन्ति, तथा न तु आत्मनः इत्यस्मिन् सन्दर्भे भगवता श्रीकृष्णेन सहिष्णुब्राह्मणस्य उपाख्यानं प्रोक्तं वर्तते। धनस्य सार्थकविनियोगः वर्णितो विद्यते। मनुष्यजन्मनः सार्थकप्रयोजनं प्रतिपादितं विद्यते। भगवता कपिलेन प्रतिपादितस्य सांख्यस्य यानि तत्त्वानि विद्यन्ते तानि प्रतिपादितानि वर्त्तन्ते। जगतः सृष्टिस्थितिलयादीनां कारणं तथा मोक्षमार्गस्य विषये बहुधा चर्च्यते। प्रकृत्याः स्वरूपभूताः गुणत्रयाः अत्र प्रतिपाद्यन्ते। त्रयाणां गुणानां वृत्तिः स्वारूप्यं च प्रतिपादितं वर्त्तते। गुणानां स्वभावः तथा तदतिरिच्यं गुणानां सर्वेषु वस्तुषु स्वस्यास्तित्वभावः प्रदर्शितः। विधिद्वारा नियन्त्रणस्थापनार्थं गुणदोषादयः पवित्रताऽपवित्रतायाः विधानं क्रियते। यदि गुणदोषौ न स्याताम्, तर्हि प्रकृतौ नियन्त्रणस्याभवः कदाचित् स्यादिति। विविधेषु शास्त्रेषु प्रतिपादितानि तत्त्वानि यथा वर्त्तन्ते तानि तत्त्वान्यादय अत्र भगवान् श्रीकृष्णः भिन्नतायाः कारणमगदत्। यथा वेदानां मन्त्राः साश्वताः भवन्ति परन्तु गुणत्रयस्य आधारेण बुद्धेः तारतम्याधारेण विविधानि व्याख्यानानि सन्ति, तथा तत्त्वेषु सृष्टिप्रक्रियायामपि तथा मतभेदो दृश्यते।

## आदर्शप्रश्नाः

**लघूत्तरीयप्रश्नाः**

१. तत्त्वानां संख्या।

२. प्रकृतिपुरुषयोः विवेकः।

३. सत्त्वगुणस्य स्वरूपम्।

**विश्लेषणात्मकप्रश्नाः**

१. काण्डत्रयाणां स्वरूपं लिखत।

२. गुणत्रयाणां स्वरूपं स्पष्टयत।

३. सुखदुःखयोः कारणानि वर्णयत।

**निबन्धात्मकप्रश्नाः**

१. गुणदोषव्यवस्थायाः स्वरूपं विशदयत।

२. सहिष्णुब्राह्मणोपाख्यानस्य महत्त्वं स्पष्टयत।

३. सांख्ययोगं प्रतिपादयत।

**एकाङ्कप्रश्नाः**

१. केनाधारेण गुणदोषयोः विवेचनं विधीयते ?

२. गुणत्रयाः के के भवन्ति ?

३. सांख्ये कति तत्त्वानि अररीकृतानि विद्यन्ते ?

४. भगवान् कं प्ररोचयामासः ?

५. वेदे कति काण्डानि वर्णितानि सन्ति ?

६. रजोगुणस्य स्वरूपं किं वर्त्तते ?

७. सत्त्वगुणाधारेण कस्य वलमेधते ?

८. कः देशः अशुद्धः इति मन्यते ?

९. तमोगुणस्य प्रभावे किं भवति ?

१०. अज्ञानं कस्य गुणस्य स्वरूपं विद्यते ?

११. सुखदुःखादयः कस्य धर्माः भवन्ति ?

१२. गुणदोषौ किमर्थं विधीयेते ?

**उत्तराणि**

१. गुणकर्मणा २. सत्तरजतमांसि ३. २५ ४. उद्धवं ५. त्रीणि ६. चलनात्मकं

७. देवानां ८. सज्जनरहितः ९. अज्ञानं १०. तमोगुणस्य ११. शरीरस्य

१२. नियन्त्रणार्थं